Digitized by Arya Samaj Foundation Chennai and eGangotri

3.3
VHP 2

व्य-शास्त्र-सारः

(संवादात्मकः)

पाणिनि-प्रज्ञा-अनुसन्धान
तिथि.....
पु०सं०.....
भारती

सङ्ग्राहकः
डा० श्रीगोपाल शास्त्री 'दर्शनकेशरी'
म० मं० पण्डितराजः (काशी पण्डित सभाध्यक्षः)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टि-काव्य-शास्त्र-सारः

(संवादात्मकः)

33
21



लेखकः

म०म० पण्डितराजः डा. श्रीगोपालशास्त्री 'दर्शन केशरी' डी० लिट्

प्रकाशकः

शास्त्रि मण्डल प्रकाशनम्

सिगरा : वा रा ण सी

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशिका
श्रीमती सरस्वती देवी
(संस्कृता त्रिपाठी) शास्त्रि मण्डल प्रकाशनम्
डी. ५९/३१ सिगरा
वा रा ण सी—१

प्रथम संस्करण : मई '१९७६
मूल्य : दो रुपये

मुद्रक
जयभारत प्रेस
बाँस फाटक, वाराणसी

CC-0.Panini Kanya Maha Vidyalaya Collection.

(33)

Digitized by Arya Samaj Foundation Chennai and eGangotri

११४

संवादसार-भूमिका

अग्ने नये सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ (यजु. ४०-१८)

यः प्रैरिरद् भट्टिकविं महाधियं सत्काव्य-निर्माणकृते महाप्रभुः ।
स एव तत्सार-विधौ प्रयोजको ममेति सर्वोऽपि विबोध्यते जनः ॥
भट्टेर्महाकाव्य-मुखेन शब्द-शास्त्रस्य पाठो बहुलाभदः स्यात् ।
समाज-शास्त्रस्य च राजनीतेर्ज्ञानं भवेद् राम-चरित्र-बोधः ॥

सर्वजन-विदितचरमिदं यद् भट्टिः कविः शिव-देवादेशात् काव्यशास्त्रमिदं भट्टिमहाकाव्यं प्रणिनायेति । तथाहि—

यदाऽयं कुल्यातोऽपरतटे समुपविष्टोऽन्तेवासिनोऽष्टकमध्यापयन्नासी तदानीमेव कोऽपि यक्षो हस्ति-कलभरूपमास्थाय कुल्यात उन्ममज्ज ।

अध्यापकाऽध्यायिनोरन्तराले हस्तिनो व्यवधाने षण्-मासाऽवकाशपातात् पाठावरोधो भवतीति चिन्तापरवशं गुरुं यक्षः स्वरूपे भवन्नुवाच । भगवन् ज्ञानपूर्वकं मेवाहं पाठावरोधविघ्नमुत्थापितवानिति शृणोतु संक्षेपात् ।

भगवतः शिवविभोरियं प्रेरणास्ति यद् भवान् अप्रतिमं काव्य-शास्त्रमेकं प्रणयतु । यत्र समाज-राजनीति-विविधागमपूर्णम् तथ्य-सम्भृतं श्रीरामचरित मुपनिबद्धं स्यात् ।

तत्रैव लक्ष्यलक्षणात्मकमिदमष्टक मुत्सर्गापवादशालि परिपूर्णं विप्रकीर्णाधिकार-प्रसन्नतिङन्तेति काण्ड चतुष्टयेन सर्वमपि संस्कृत-वाङ्मय-रहस्यं विवृणोतु । यदध्ययनतोऽन्ते-वासिनः शब्दशास्त्रस्य साहित्यस्य च पद-पदार्थज्ञानं कुर्वन्त उभय-शास्त्रमर्मज्ञा अल्पीयसैवानेहसा स्युरिति ।

वाल्मीकिनापि परित्यक्तमिति वृत्तं छन्दो बद्धं भवन्निर्मितं भवन्नाम्नैव जगति विश्रुतं स्यात्काव्य[1]शास्त्रनाम्नेति व्याहृत्य तिरोबभूव । तस्यैव मध्ये मध्ये निबद्धस्य संवाद-सङ्घस्य संक्षिप्तः संग्रहोऽयं भट्टि-संवाद-सार इत्यलम् ।

---

१. चतुर्धासारस्वतः प्रसरः—शास्त्रं काव्यं शास्त्रं-काव्यं काव्यशास्त्रं चमेदतः ।
चतुष्प्रकारः प्रसरः सतां सारस्वतो मतः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदाऽहं श्रीबदरीनाथ-धामनि ज्योतिर्मठे (जोशीमठे) श्रीबदरीनाथ-वेद-वेदाङ्गमहाविद्यालये भट्टि-काव्यशास्त्रस्य द्वितीय-सर्गस्थं राम-मारीच-संवादं संगृह्य वार्षिकोत्सवे छात्रैरभिनयं कारितवान्। तत्राभिनय-दर्शका अतीव चमत्कृता अभूवन्। बहुभिरभिनय-भूमिकाभृद्भ्यःछात्रेभ्या बहुरूप्यकपुरस्कार-प्रदानं कृतम्।

अत एवोत्साहितोऽहं श्रीबदरीनाथदेव-प्रेरणया सर्वसंवादानां संग्रहं विधाय तदानीन्तने काशीतो निःसरति गाण्डीव संस्कृतपत्रे शनैःशनैः क्रमशो मुद्रापणं प्रारब्धवान्। ततस्तु तत्पाठतः प्रभावितः स्वर्गीयस्तत्-सम्पादकः श्रीराम बालक शास्त्री महोदयो मत्पार्श्वमागत्य साग्रहं सानुरोधमभ्यधात्।

शास्त्रिवर्याः! भवतामय संवादसंग्रहः सर्वः संस्कृतमहाविद्यालय-विद्यालय-प्रधानाध्यापकैः समर्थ्यते। भूरिशस्तत्प्रशंसायां मत्पार्श्वे पत्राण्यागतानि सन्ति। भवन्तः 'भट्टिसंवादसार' इति नाम्ना ग्रन्थाकारमिमं गाण्डीवस्योपकुर्वन्तु अस्थायिकुलपतिना श्रीकरुणापतिनापि वचनदानेन समर्थितोऽस्ति। तस्य स्थायि-कुलपतित्वेऽहं परीक्षा-पाठ्य-प्रतिष्ठितं कारयिष्यामि। येन हि गाण्डीवस्याथिको निधिः स्याद्। भवन्तः केवलं कर्गज-साहाय्यं ददतु। अहमेतस्य मुद्रणं कारयामीति?

कथयित्वेत्थं शास्त्रिवर्यः संवादसारं मुद्रापयन्नभूद्। अहं कर्गजसाहाय्यं दातुं प्रारब्धवान्। पञ्चस्फारावधिं मुद्राप्य शास्त्री महोदयोऽकालकवलितः स्वः प्रस्थितस्तथापि तद्वाग्-बद्धोऽहं स्वद्रव्येणैवावशिष्टभागं मुद्राप्य ग्रन्थाकारतां नीतवानस्मि। अग्रे तु शास्त्रिवर्य्याणामवशिष्टसंकल्पसिद्धि-सम्पादनं तन्मित्राणां कर्मेति विषयमिम समुपहरन्नग्रे सँव्वादसार-सम्बन्धे किञ्चिन्निवेदयामि।

शास्त्रं साहित्यमित्याहुः सर्वकाव्याङ्गलक्षणम् (काव्य प्रकाशादि)
काव्यं विशिष्टशब्दार्थ-साहित्यं सदलङ्कृति (रघुवंशनैषधादि)
शास्त्र-काव्यं चतुर्वर्गप्रायं सर्वोपदेशकृत् (रामायणमहाभारतादि)
भट्टि-भौमक-काव्यादि काव्यशास्त्रं प्रगीयते (सुभद्राहरणादि च)
(तत्र सर्वप्रथमं भट्टेर्नामोल्लेखस्तस्य महाकाव्यस्य काव्यशास्त्रत्वात्पाणिनेरष्टकप्रकाशकत्ववैशिष्ट्यादिति)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संवादसारः

998/6

संवादसारोऽयं भट्टिकाव्यशास्त्रस्य हृदयं विद्यते। एतस्याऽध्ययनेन प्रायः सर्वमेवेतिवृत्तम् संक्षेपतोऽर्थातं भवति। दृश्यकाव्यतयाऽभिनयप्राधान्याच्च झटित्येव हृदये समारूढं जायते। परीक्षाराज्ये शास्त्रिवर्यस्य निवेशन-संकल्पः समुचिततरोऽस्ति। छात्राणामेतेन पाणिनीयाष्टकाध्ययनलाभेन सहैव लक्ष्य-प्रयोगाणां यथार्थ-प्रयोगप्रकारबोधा वर्द्धते। यदर्थमुक्तम् पतञ्जलिना 'एकःशब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग् भवतीत्यादि'

किं बहुना 'न हि कस्तूरिकामोदः शपथेन विभाव्यते' इति हि विदुषामाभाण-कमस्यापि संवादसारस्य विषये विद्यते। मूलान्येव पद्यानि संगृहीतानि टीकास्थाने भट्टिकाव्यमेव सहायकं स्याद् गुरवो वाऽध्यापयेयुश्च। छात्रास्तु वार्षिकोत्सवे स्वयमभिनयं कुर्वन्तः सर्वरहस्यवेदिन एव स्युरिति। एतत्संवादसंग्रह-कृत्ये प्रेरकं परमेश्वरमेव स्वात्मानं परिशीलयन्—

'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्'।

इति तत्स्वरूपिणो श्रीकरुणापतित्रिपाठिने सं० वि० विद्यालय कुलपतये समर्प्य सर्वानेव संस्कृतोपासकानभ्यर्थये सफलयन्तु स्वर्गीयस्य गाण्डीव-सम्पादकस्य श्रीरामबालक शास्त्रिणो महाभागस्य जगन्मङ्गलकरं शुभसंकल्पमिति शिवम्।

स स्वतन्त्रः कविः शब्द-शास्त्रानुगं रामवृत्ताऽमृतप्लावितं साऽमरम्।[1]
यच्चकारानुप्रास-प्रसादादिमी[2] रावणान्ताभिधं काव्य-शास्त्रं महत्॥
कालतस्तद्विधर्म-क्षितीशार्दिते प्रारतन्त्र्यप्रधाने गुणेऽन्तर्हितम्।
तस्य काव्यस्य मर्मप्रकाशोऽधुना भारते स्यात् 'स्व-संवाद'-साराध्वना॥
पाणिनीयो नयो दुर्लभः साम्प्रतं नत्-प्रवक्ताऽप्यहो भाग्यतो लभ्यते।
भट्टि-संवाद-सारात् पदं साध्यते यत् प्रभूतं समस्तेषु शास्त्रेष्वपि॥

---

१. अमरकोशेन सहितं सामरम्।

२. 'प्रह्वेवा' इति सूत्रतः 'नु' लघु 'स' गुरु बोध्ये अक्षरे।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यह 'संवादसार' अभिनयरूपमे निबद्ध है। सूत्रधार द्वारा नाटकावतरणमें दो छात्रोंने इसका संक्षिप्त परिचय दिया है। इसे ग्रन्थाकार बनवाने वाले स्वर्गीय रामबालक शास्त्री जीने अपनी भूमिकामें भारतीय संस्कृतिका परिचय देते हुए श्री शङ्कराचार्यके विस्तृतकार्योंका संक्षिप्त परिचय दिया है। तदनन्तर जोशीमठके वर्तमान आचार्यने भट्टिकाव्यशास्त्रके विस्तृत परिचयमें पाणिनीयाष्टकका बड़ा बखान किया है। और संवादपढ़नेमे अष्टकका उपयोग आवश्यक बताया है। अतः अष्टक पढ़नेका क्या प्रकार है। उसे यहां देना अत्यावश्यक है। विना उसके संवाद सारकी भूमिका अधूरीही रह जायगी—

सदाऽध्येया सर्वेर्निगमसदृशी पाणिनिमुने-
रहो ! अष्टाध्यायी झटिति पदबोधप्रणयिनी।
सुपूर्णा वैज्ञानी ध्रुवमतिशयाह्लादजननी
स्वयं स्वार्थं ब्रूते क्रम-नियम-पाठेन सुगमा ॥ २ ॥

"सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति। मातापितरौ चास्य स्वर्गे लोके महीयेते।" (भाष्य- अ० १, पा० १, आ० २)

महाभाष्यकार पतञ्जलिने पाणिनीय सूत्रोंकी प्रशंसामें लिखा है कि यह अक्षरवेद[१] 'अइउण्' इत्यादि चौदह लोकस्थानीय जो १४ सूत्र-समुदाय है, यही वृद्धिरादैच् १।१।१ प्रभृति सूत्र-समुदाय द्वारा पुष्पित होता है। एवं सूत्रक्रमानुसार सूत्रोंकी अनुवृत्ति और अधिकार विधिसे अर्थज्ञान कर लेने

१—इन्हीं सूत्रोकी आध्यात्मिक व्याख्या नन्दिकेश्वरने की है। जिसमें शब्द सृष्टिद्वारा सारे ब्रह्माण्डका प्रतीक 'अइउण्' सूत्रके 'अ' से लेकर हल्के 'ह' तक 'अहम्' प्रत्याहार बन जाता है 'अहम्' जब भी आप कहें तब सारे ब्रह्माण्डमें व्याप्त अपनेको मानें न कि साढ़े तीन ३½ हाथकी यह देह। यही महा 'अहम्' कहाता है। जिसके लिये प्रत्यभिज्ञाशास्त्र कहता है—'महाहमि स्वं सततं सभादधद् विशुद्धरूपो मितदेह-दाहकः। तथा मितान्तःकरणेन्द्रियादिकं विदाह्य तिष्ठन्नहमस्मि भैरवः। इति।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर फलित होता है। तथा वार्तिक परिभाषादिके ज्ञानसे चन्द्रके समान ताराओंसे प्रतिमण्डित होकर वाक्समाम्नाय (वाग्वेद) ब्रह्मराशि हो जाता है। इसलिये इसे अवश्य पढ़ना चाहिये। इसके (अष्टाध्यायी सूत्रसंघके) ज्ञान कर लेने पर सारे वेदके पढ़नेका पुण्य फल मिलता है और उसके (पढ़ने वालोंके) माता-पिता स्वर्गलोकमें पूजित होने लगते हैं।

ऐसी प्रशंसाके रहते भी परतन्त्र भारतमें अष्टाध्यायीका पाठ बन्द हो गया था। आश्चर्य तो इस बात पर हो रहा है कि, बड़े-से बड़े विद्वानोंकी भी प्रतिभा परतन्त्रकालपे कुण्ठित हो जाती है। जिससे ऊपरके भाष्यका अर्थ भी संकुचित कर दिया गया है। महामुनिने यद्यपि सूत्रोंकी वृत्ति स्वयं बनानेके लिये साक्षात् कितने ही परिभाषासूत्रोंकी रचना की है; तौ भी अधिकार अनुवृत्ति और उन सूत्रोंको लगाकर सूत्रार्थ न कराकर परतन्त्र भारतके विद्वान्, छात्रोंसे सूत्रवृत्ति रटवाने लगे, जिससे न केवल पाणिनि के मूल संकल्पकी ही हत्या हो गयी, अपितु पाणिनि-व्याकरण सरलता छोड़कर दुरूह और वृत्ति रटनेके कारण कष्टसाध्य हो गया।

मैं यहाँ पाणिनिकी आविर्भावित पद्धतिका दिग्दर्शन करा रहा हूँ।

सूत्रार्थ करनेमें सर्वप्रथम सन्धिविच्छेदके साथ पदच्छेद कर चुकने पर ही यह देखा जाता है कि इस सूत्रमें किस सूत्रका अधिकार है और किस सूत्रसे किस पदका अनुवृत्ति आ रही है।

जिस सूत्रके सभी पदसमूह अर्थात् पूरा सूत्र अपने यहाँ कोई प्रयोजन सिद्ध न करके केवल अन्य सूत्रोंमें बड़ी दूर तक जाता है, वह 'अधिकार सूत्र' कहाता है। जहाँ सूत्रका कुछ ही पद अपने यहाँ प्रयोजनसिद्ध करता हुआ ही कुछ सूत्र तक जाता है, इस प्रक्रियाको 'अनुवृत्ति' कहते हैं।

पाणिनिकी अष्टाध्यायीमें दो प्रकारके पद प्रायः सभी सूत्रोंके अर्थ करने में पाये जाते हैं। एक तो उन्हीं सूत्रोंके और दूसरे ऊपरके सूत्रोंसे आये हुए अनुवृत्तिके। इसलिये अष्टाध्यायी सूत्रोंके अध्याय, पाद सूत्रसंख्या तथा पर, नित्य, अन्तरङ्ग, अपवाद इत्यादि (जो पाणिनीय सूत्रोंकी विशेषताएँ हैं) का ज्ञान अनिवार्य है। इनके ज्ञान किये बिना पाणिनीय व्याकरण पढ़ा ही नहीं जा सकता। अष्टाध्यायी पद्धतिसे पढ़ना ही पाणिनीय व्याकरणमें सरलता

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लाना है। क्योंकि सूत्रोंके पूर्वापरीभाव जाननेसे अपने आप वृत्ति बना ली जाती है। वृत्ति रटनेका भारी परिश्रम जो पाणिनिकी सारी तपस्या की हत्या ही कर देता है, वह बिलकुल बन्द हो जाता है, इस प्रक्रियामें यही अद्भुत लाघव है।

वृत्ति (सूत्रार्थ) बनानेकी पाणिनि निर्दिष्ट-पद्धति—

सम्प्रघुष्य क्रमात्पाणिनीयाष्टकं सन्धिवोधात्पदच्छेदतोऽर्थं चरेत्।
पूर्वसूत्रं परस्मिन् समासज्जयन्निर्विशेषां जहत्तद्विभक्तिं समाम् ॥ १ ॥
पूर्वसूत्रं परस्मिन्समासज्जदा स्वाधिकारावधिं शृङ्खलावृद्धितः।
तत्समानं पदं स्वं जहद्धीतरत् सर्वमेवोपहारीकरोत्यादरात् ॥ २ ॥
किन्तु तत्रापि चेद् यद्विशेष्यादिकं तत्समानं पदञ्चापि याति स्वतः।
इत्थमाविष्करोत्यर्थमत्यद्भुतं यो न जन्मान्ततः क्वापि विस्मर्य्यते ॥ ३ ॥
तत्परं पाणिनीय-प्रबोधं स्वयं सम्पठन्नर्थबोधं हृदा धारयन्।
तद्बलेनानुवादादि कुर्वन् धिया मासषट्केन शब्दार्णवं सन्तरेत् ॥ ४ ॥
विमृश्य शास्त्रं विनिमथ्य हार्दं ग्रन्थो निबद्धो वरदः 'प्रबोधः'।
वैज्ञानिकः संस्कृतशिक्षणार्थं मृदुः स्वयं छात्रगणैः सुपाठ्यः ॥ ५ ॥

छात्र पहले क्रमसे पाणिनीयाष्टक चाहे पूरी 'अष्टाध्यायी' ३९९४ सूत्र या उसका संक्षिप्त संस्करण 'ऋजुपाणिनीयम्' (१५:५) याद कर लें। 'ऋजुपाणिनीयम्' में दिये गये सन्धि, समास, तथा पदोंके प्रकारको खूब समझलें। इन तीनोंमें सूत्रके अतिरिक्त कुछ भी दूसरी वस्तु रटनेकी नहीं है। सब समझन ही है। बस, सूत्रोंकी सन्धि तोड़कर पदच्छेद करते हुए सूत्रोंका अर्थ करना है। हां पदच्छेद कर चुकने पर जितने पद सूत्रमें हों यदि उन्हीं पदोंसे पूरा अर्थ न हो जाता हो तो, उस सूत्रसे पूर्व सूत्रके असमान विभक्ति वाले पद उसमें अवश्य ही चले आते हैं। और समान विभक्ति वाले पद नहीं आते, इसका ध्यान बराबर रखना पड़ता है।

क्योंकि पूर्व सूत्र आगेके सूत्रोंमें अपने अधिकार तक जाता हुआ शृङ्खला-वृद्धिसे आगेके सूत्रके समान विभक्तिवाले अपने पदको नहीं जाने देता किन्तु

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

असमान विभक्तिवाले सभी पदोंको आगेके सूत्रमें बड़े आदरसे उपहार (भेंट) कर देता है। हां समान पदमी यदि विशेषण रहता है तब तो वह स्वयं उत्तर-सूत्रमें चला ही जाता है, वह नहीं रुकता, यों पूर्वसूत्र उत्तर सूत्रोंका अर्थ जो अद्भुत रूपमें प्रगट करता है। वह जन्म भर भूलता नहीं है। इस प्रकार सूत्राथ कर चुकने पर 'पाणिनीयप्रबोध' को अपने आप पढ़ता हुआ छात्र उसके अर्थोंको हृदयमें बैठाता जाय एवं उदाहरणोंका अर्थ भी अध्यापकोंसे पूछ पूछकर समझता जाय तो व्याकरणका पर्य्याप्त ज्ञान हो जाता है। बाद उसी व्याकरण ज्ञानके बलपर अनुवाद करता जाय, यों साहित्य ग्रन्थ हितोपदेश आदिको पढ़कर छ मासमें ही शब्द सागर पार कर जाता है। इसी दृष्टिसे सभी शास्त्रोंका विचार करके पाणिनिके हृदय स्थित संकल्प द्वारा प्रमाणित यह 'वैज्ञानिक' पद्धतिका 'वरद' ग्रन्थ 'पाणिनीय प्रबोध' लिखा गया है। जो बहुतही सरल एवं छात्रों द्वारा स्वयं वढ़ने योग्य है।

अधिकार या अनुवृत्तिसे आये पदोंको सूत्रके पदोंके साथ सिलसिलेवार (अन्वय करके) बैठाकर क्रियाओंसे 'स्यात्' 'भवेत्' 'भवति' इत्यादि अन्तमे लगाकर वृत्ति बना ली जाती है। अपने आप बनायी हुई इस वृत्तिको चाहे समझकर ही मनमें बैठा लें या दो चार बार रट लें। जैसे भी इसका दृढ़ संस्कार मन पर बैठ जाय वैसा छात्रोंको कर लेना चाहिये (इससे पाणिनीय व्याकरण पढ़नेमें सरलताके साथ छात्रकी मेधाशक्ति जा बढ़ती है, वह महर्षि पाणिनिकी विलक्षण देन है। जिसे स्वतन्त्र भारतमें प्रदीप्त करना सभी मनी-षियोंका कर्तव्य है। उदाहरणार्थ सूत्रार्थ (वृत्ति) जैसे—[१]

१—लघु कौमुदीके संज्ञा प्रकरणमें (सूत्रेषु अदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र) ऐसा लिखा तो है। पर 'अष्टाध्यायी 'या' ऋजु पाणिनीयम्' न जाननेसे न अध्यापक ही यह कार्य कर सकता है और न छात्र ही। अतः अपनी भलाई चाहने वाले छात्र कमसे कम 'ऋजु पाणिनीयम्' रटकर ही वृत्ति बनावें। वृत्ति रटना तो महापाप है।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तमाने लट् ३।२।१२३ पदच्छेद—वर्तमाने ७।१ लट् १।१ (इति पदद्वयात्मकं सूत्रम्) इसमें ऊपरसे प्रत्ययः ३।१।१ परश्च ३।१।२ (पञ्चमाध्यायतक अधिकार है) ये दोनों अधिकारसूत्र आ जाते हैं। तीसरा धातोः ३।१।९१ (तृतीयाध्यातक अधिकार है) यह सूत्र आता है।

इन सूत्रोंके सभी पदोंको सिलसिलेवार (अन्वय करके) बैठाकर वृत्ति बनती है—वर्तमाने धातोः परः लट् प्रत्ययः (भवति) इसकी हिन्दी स्वयं छात्रको अपने आप विभक्तियोंके अर्थानुसार कर लेनी होगी—'वर्तमान (काल) में धातुसे परे लट् प्रत्यय होता है। हिन्दी करनेमें पञ्चमी, सप्तमी, षष्ठी, प्रथमा यही क्रमहै। जहां जितने भी हों, उनको इसी क्रमसे बैठाना है।

सूत्रमें जिस विभक्ति वाला पद होता है, उस विभक्ति वाला पद ऊपरके सूत्रसे नहीं आता जैसे—ङ्किति च १।१।५ यह सप्तम्यन्त पद है, अतः यहाँ न धातुलोप आर्द्धधातुके १।१।४' से केवल 'न' और 'इको गुणवृद्धी १।१।३' यह पूरा सूत्र आ जाता है। तब वृत्ति बन जाती है—'ङ्किति च न इको गुणवृद्धी भवतः'। 'अस्ति' 'भवति' क्रिया तो जहाँ कोई क्रिया न रहे वहाँ लगा दी जाती है। यह तो सर्वसाधारण प्रसिद्धि है ही।

यों ही जहाँ बिना सम्बन्धविशेषकी षष्ठी विभक्ति होती है वहाँ षष्ठी के आगे 'स्थाने' यह पद जोड़कर वृत्ति बना ली जाती है। जैसे—इको यणचि ६।१।७७ इस सूत्रमें 'इकः' षष्ठी किसी सम्बन्धविशेषमें नहीं है अतः उसके आगे 'स्थाने' जोड़कर इकः स्थाने' ऐसा अर्थ करते हैं और संहितायाम् ६।१।७२ का अधिकार आ रहा है तो अर्थ होता है—अचि परे संहितायाम्। इकः स्थाने यण् भवति। यों ही एचोऽयवायावः ६।१।७८ यह सूत्र इको यणचि ६।१।७७ के नीचे है तो इसमें षष्ठ्यन्त और प्रथमान्त पद रहनेके कारण 'इकः' और 'यण्' नहीं आवेंगे किन्तु केवल 'अचि' सप्तम्यन्त पद ही आवेगा और इसकी 'एचः' षष्ठीके आगे स्थाने लग जायगा और संहितायाम् ६।१।७२ का अधिकार ६।१।१५८ तक चल ही रहा है, तो इस सूत्रकी वृत्ति बन जायगी—अचि संहितायाम् एचः स्थाने अयवायावः भवन्ति। योंही इस प्रकारके सूत्रोंकी

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्ति अपने आप बनती जायगी। इसके लिये पाणिनिजीने षष्ठी स्थाने योगा १।१ ४९ यह परिभाषासूत्र वृत्तिबनाने वाला स्वयं लिख दिया है।[1]

यों ही जहाँ 'गुणः', 'वृद्धिः', ऐसे शब्द हों, चाहे वे सूत्रोंमें ही हों या ऊपरके सूत्रसे आये हों, वहाँ 'इकः' षष्ठ्यन्त पद आकर अन्य नियमोंके अनुसार मिलकर अर्थ कराता है, जैसे—सार्वधातुकार्द्धधातुकयोः ७-३-८४ में 'अङ्गस्य' ६-४-१ का अधिकार आनेके कारण मिदेर्गुणः ७-३-८२ से 'गुणः' आता है तब 'गुणः' के आने पर 'इकः' यह षष्ठ्यन्तपद आ जाता है। बाद 'इकः' इस विशेषणमें अन्त लग जानेसे 'सार्वधातुकार्द्धधातुकयोः परयोः इगन्तस्य अङ्गस्य गुणः भवति'। वृत्ति बनजाती है। इसका सूत्र है, इको गुणवृद्धी १-१-३।

यों ही जहाँ 'ह्रस्व' 'दीर्घ' 'प्लुत' शब्द पड़ा रहे या ऊपरसे आता हो वहाँ 'अचः' यह षष्ठ्यन्त पद जुट जाता है। जैसे—'ह्रस्वः ७-४-५९' सूत्र है। इसमें, अत्र लोपोऽभ्यासस्य ७-४-५८ से अभ्यासस्य आता है। बाद इसमें 'ह्रस्व' शब्दके कारण 'अचः' षष्ठ्यन्तपद आजाता है तो वृत्ति बनती है 'अभ्यासस्य अचः ह्रस्वो भवति।' इसका सूत्र है-अचश्च १।२।२८

यों ही सप्तमीको छोड़कर पञ्चमी षष्ठी प्रभृति विभक्ति वाले विशेषणों में' 'अन्त' शब्द लगा कर उसी विभक्ति वाला उसे बना लेते हैं और सप्तमी वालेमें आदि लगाकर जैसाका तैसा सप्तमी विभक्ति रहने देते हैं जैसे—सुपि च ७-३-१०२ इस सूत्रमें अङ्गस्य ६-४-१ का अधिकार आता है और अतो दीर्घोः यञि ७-३ १०१ सम्पूर्ण सूत्र आजाता है तो 'यञि सुपि अतोऽङ्गस्य दीर्घ' ऐसा पदोंका क्रम बैठता है। यहाँ 'अतः' षष्ठी विभक्ति वाला विशेषण है और यञि सप्तमी वाला तो उधर 'अन्त' लगा, इधर 'आदि' लगा दोनों जगह अपनी अपनी विभक्ति बनी रही तो वृत्ति इस तरह बन गयी—यञादौ सुपि अदन्तस्य अङ्गस्य दीर्घः (भवति) इसके लिये क्रमशः नियम है-येन विधिस्तदन्तस्य १-१-७२ यस्मिन् विविस्तदादावल्ग्रहणे।

---

१ – सूत्र-वृत्तिं स्वय कुर्युरध्यायिनः पाठनस्य प्रकारोऽयमासीन्मुनेः।
तद्विहन्त्री पठत्प्राण-हर्त्री हृदा निष्क्रमा पाठरीतिर्द्रुतं हीयताम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामि ६-४-३ सूत्रमे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः ६-३-१११ से 'दीर्घः' आता है। इसलिये यहाँ 'अचः' यह षष्ठ्यन्त पद उपस्थित हो जाता है। बाद 'अङ्गस्य' अधिकार आनेसे अचः विशेषण हो जाता है तो उसमें 'अन्त' शब्द लग जानेसे 'नामि परे अजन्तस्य अङ्गस्य दीर्घः भवति' यह वृत्ति बन जाती है।

इसका सूत्र है अचश्च १-२-२८ इसमें ऊकालोऽज्झ्रस्व-दीर्घप्लुतः १-२-२७ से ह्रस्वदीर्घप्लुतः आकर अर्थ करा देता है कि जहाँ भी ह्रस्वदीर्घप्लुत पड़ा हो वहां 'अचः' षष्ठ्यन्त पद उपस्थित हो जाता है।

इसी प्रकार पर नित्य अन्तरङ्ग अपवाद, असिद्ध इत्यादि परिभाषाओंका ज्ञान भी इस व्याकरणमें अत्यावश्यक है। अष्टाध्यायी पाठमें जो सूत्र पूर्वसे बादमें पढ़ा रहेगा वह पूर्वसूत्रकी अपेक्षा सवासात अध्यायतक बली होता है।

इसका सूत्र है विप्रतिषेधे परं कार्य्यम् १-४-२ यों ही *नित्य अन्तरङ्ग-अपवादों में परसे नित्य बली, पर नित्यसे अन्तरङ्ग बली, पर, नित्य और अन्तरङ्गसे अपवाद बली होता चलता है। कहा भी है कि 'पर-नित्यान्त-रङ्गापवादानामुत्तरोत्तरं बलीयः'।

ऐसा ही सूत्र है 'पूर्वत्रासिद्धम्' ८-२-१ यह ८ वें अध्यायके द्वितीय पादका पहला सूत्र है। इसका अर्थ है कि पूर्वमें अर्थात् सात अध्याय और आठवें अध्यायके पहले पादके सूत्रोंमें आठवें अध्यायके दूसरे तीसरे और चौथे पादके सूत्र असिद्ध हैं। जब यह सूत्र ८-२-१ आठवें अध्याय दूसरे पादका पहला सूत्र होकर परिभाषा-सूत्र रहता है, तब तो यह अर्थ होता है। जब यह सूत्र अधिकार हो जाता है। तब आगेके सूत्रोंमें जाकर बैठ जाता है और वहाँ बैठा बैठा अर्थ करता है कि तुम पूर्वत्र (पूर्व सूत्रोंमें) असिद्ध हो अर्थात् आठवें अध्यायके तीन पादके सूत्रोंमें भी पूर्व पूर्वके सूत्रों-में परके सूत्र असिद्ध हैं।

जैसे--हरे+इह यहाँ एचोऽयवायावः ६-१-७८ लगकर 'ए' को 'अय्' करके हरय् इह बनाया। तब लोपः शाकल्यस्य ८-३-१९ ने लगकर य् का

---

*कृताकृतप्रसङ्गी विधिर्नित्यः। अल्पापेक्षकमन्तरङ्गम्। बह्वपेक्षकं बहिरङ्गम्। निरवकाशो विधिरपवादः। प्राप्तौ सत्यां विधिर्नियमः स्यात्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोप कर दिया हर+इह बन गया। यहाँ पर आद्गुणः ६-१-८७ लगने लगा तो 'पूर्वत्रासिद्धम्' ८-२-१ के कहनेसे लोपः शाकल्यस्य ८-३-१९ आद्गुणः ६।१।८७ की दृष्टिमें असिद्ध हो गया अर्थात् य् का लोप वहाँ है ही नहीं, वहाँ 'य्' ही पड़ा है, तो अ+इ नहीं है अ+य है, तो 'आद्गुणः' की प्रवृत्ति ही नहीं हो सकती। इस प्रकार लगे सूत्रोंको भी यह असिद्ध करके प्रयोग सिद्ध करता है।

इत्यादि बातोंकी जानकारी पाणिनीय व्याकरण पढ़ने वालोंको अवश्य करना ही चाहिये—सबसे आवश्यक पाणिनीय व्याकरणमें सूत्रोंका [1]क्रमसे पढ़ना है। सूत्रोंको क्रमसे पढ़नेमें ही सरलता, मेधावर्द्धकता प्रभृति अनेक अवर्णनीय गुण प्राप्त हो सकते हैं। यही तो इसका विज्ञान है।

इसलिये 'पाणिनीय प्रबोधके' पढ़नेसे पहले 'ऋजुपाणिनीयम्' (संक्षिप्ताष्टाध्यायी १५२५ सूत्र) कण्ठ कर लेना होगा। (कण्ठ रहनेसे लघुकौमुदी या प्रबोधमें सूत्रार्थ करते समय अनुवृत्ति लेनेके लिये पूर्वसूत्र दृष्टिके सामने आ जाते हैं। नहीं तो 'ऋजुपाणिनीयम्' सामने रखकर सूत्रोंको टटोलना पड़ता है), वयस्कोंकी इच्छा पर निर्भर है। कण्ठ करलें तो अच्छा ही है। कण्ठ न करनेसे प्रबोधमें सूत्रार्थ करते समय अनुवृत्ति लेनेके लिये 'ऋजुपाणिनीयम्' सामने रखना ही चाहिये। 'ऋजुपाणिनीयम्' के पढनेसे पहले हिन्दी-भाषा द्वारा अक्षरविज्ञान, पदज्ञान, विभक्त्यर्थ, समास, सन्धिज्ञान इत्यादिका ज्ञान किसी भी संस्कृत पुस्तकसे कर लेना नितान्त आवश्यक ही नहीं अनिवार्य है। बिना इतने ज्ञानके कोई भी संस्कृत पुस्तक पढ़नेका अधिकारी नहीं हो सकता। संस्कृतभाषाका इतना ज्ञान वाला ही व्यक्ति वृद्धिरादैच् १।१।१ प्रभृति सूत्रोंका पदच्छेद (सन्धि तोड़ कर पदोंको अलग-अलग कर देना) स्वयं समझ सकता है। तथा यह भी समझ सकता है कि किस विभक्तिके किस वचनका यह पद है और किस सन्धिके कारण एकमें

१—क्रमोपबन्धेऽप्यथ लाघवे मुनेः तपः प्रकर्षं प्रतिभा परिश्रमौ। विलोक्य मुग्धोऽस्मि च वक्तुमक्षमः प्रशीलयत्नः प्रविदन्तु पण्डिताः॥ (पा० प्र०)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पृक्त (सट गया) है। (इतना ज्ञान न कराकर बिना समझे लघुकौमुदी रटानेकी प्रथाने ही संस्कृतको कठिन और घोखू बना दिया है तथा लोगोंको संस्कृत पढ़नेसे विमुख कर दिया है।) संस्कृत तो हिन्दी वालोंको भी पढ़नी चाहिये।

अस्तु, इस प्रकार जब सभी सूत्रोंका अर्थ 'ऋजुपाणिनीयम्' द्वारा करके 'संवादसार' लेकर अपने आप अन्वय और अर्थ करके प्रयोगोंको साधता चला जाय। अध्यापक तो केवल उसे सहारा दिया करें।

यों वृत्ति स्वयं बनाकर पाणिनीयाष्टक या ऋजुपाणिनीय पढ़कर लघु कौमुदी या ऋजु पाणिनीय प्रबोध पढ़े हुए छात्र तो उदाहरणार्थ 'भट्टिसंवाद सार' अवश्य पढ़ें। इस प्रकार वे संस्कृतके सुबुद्ध विद्वान् बनजायगें।

अबमैं इस संवादसारको ग्रन्थाकार बनाने वाले स्वर्गीय परमतपस्वी पं० रामबालक शास्त्रीजीको तथा उनकी कामनाको सफल करने वाले संस्कृत विश्वविद्यालयके कुलपति श्रीपण्डित करुणापति त्रिपाठीजीको हृदयसे साधुवाद प्रदान कर यह भूमिका समाप्त करता हूँ।

हां जय भारत प्रेसके संचालक श्री हरिदास भगत को विशेषरूपसे धन्यवाद देता हूँ जिन्होंने इस पुस्तकको मुद्रित कर इस रूपमें प्रस्तुत किया और छपाईका शुल्क भी स्वर्गीय शास्त्रीजीकी श्रद्धाञ्जलिमें समर्पित कर दिया है। संवादसारके संबन्धमें सहायक अपने स्वाङ्ग वर्ग तथा राजकिशोर मिश्रको शुभाशीर्वाद प्रदान करताहूँ कि वे लोग सतत समृद्धि प्राप्त करें।

श्री शरद कुमार 'साधकजी' (चौराहा सम्पादक) को विशेषतः धन्यवाद है, जिन्होंने 'भूमिका' सजाकर 'संवादसारको' चमका दिया है।

—डा० श्रीगोपालशास्त्री 'दर्शनकेशरी'
[काशीपण्डित-सभाध्यक्षः तथा राष्ट्रपतिः सम्मानितः]
डी. ५६/३१ सिगरा, वाराणसी

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संवादसूची

संवादनामानि—	पृष्ठ
१. छात्रद्वयसंवादः	२
२. श्रीरामबालकशास्त्रि-वक्तव्यम्	५
३. इन्दुप्रकाश उपाध्याय-वक्तव्यम्	९
४. विविध-विबुधसंवादः	१९
५. पन्त-डोभाल-संवादः (दशरथविश्वामित्रभूमिकायाम्)	२२
६. तपोधन-राम-संवादः	२५
७. जनता-राम-संवादः	२७
८. श्रीराम-भरत-संवादः	२८
९. सूर्पणखा-लक्ष्मण-संवादः	२९
१०. " खरदूषण-संवादः	३२
११. " रावण-संवादः	३३
१२. रावण-मारीच-संवादः	३७
१३. सीता-लक्ष्मण-संवादः	३९
१४. रावण-सीता-संवादः	४१
१५. जटायु-रावण-संवादः	४५
१६. राम-लक्ष्मण-संवादः	४५
१७. कवन्ध-राम-संवादः	४९
१८. राम शबरी-संवादः	५१
१९. राम-लक्ष्मण-संवादः	५३
२०. कपि-राम-संवादः	५५
२१. सुग्रीव-राम-संवादः	५७
२२. बालि-राम-संवादः	५९
२३. राम-लक्ष्मण-संवादः	६१
२४. सुग्रीव-लक्ष्मण-संवादः	६२
२५. " सेना-संवादः	६३
२६. राम-हनुमत् संवादः	६५
२७. अङ्गद-स्वयंप्रभा-संवादः	६५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२८. सम्पाति-कपि-संवादः ६६
२९. मैनाकाद्रि-कपि-संवादः ६९
३०. रावण-सीता-संवादः ७१
३१. त्रिजटा-राक्षसी-संवादः ७३
३२. कपि-सीता-संवादः ७४
३३. रावण-रावणि-संवादः ७९
३४. " विभीषण-संवादः ८०
३५. हनुमद्रावण-संवादः ८२
३६. कपि-सीता-संवादः ८५
३७. हनुमद्राम संवादः ८७
३८. मातृ-विभीषण-संवादः ८९
३९. रावण-मन्त्रिपरिषत्संवादः ९०
४०. " कुम्भकर्ण-संवादः ९७
४१. रावणि-विभीषण-संवादः ९९
४२. राम-विभीषण-संवादः १००
४३. पुनाराम-विभीषण संवादः १०२
४४ हनुमत्सीता-संवादः १०३
४५ लङ्केश-सीता-संवादः १०४
४६. राम-सीता-संवादः १०६
४७. अग्न्यादिदेव-राम-संवादः १०७
४८. राम-हनुमत्-संवादः ११०
४९. " कपीश-लङ्केश-संवादः १११
५०. राम-सीता-संवादः ११२
५१. छात्र द्वय-संवादः ११३
५२. अध्यापक-द्वय संवादः ११४
५३. परिशिष्टम् ११७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म् तत्सत् श्रीकृष्णः शरणं मम

अथ भट्टि-महाकाव्य-सारः

(संवादात्मकः)

तत्र प्रथमः सर्गः

नान्दीपाठः—

"ॐ अग्ने ! नय सुपथा रायेऽस्मान् देव विश्वानि वयुनानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम।"

(मालिनीछन्दसा गायति)

उपगतवति दिव्यं स्वं स्वतन्त्रत्वमित्थम्—
प्रकटितवति नैजं गौरवं द्वीपसङ्घे
अपि भवति पुराणं तन्नवं भारतेऽस्मिन्
नयमिममनुवृत्तं श्रीमहेशः सदाऽव्यात् ।१।

(भुजङ्गप्रयातेन)—

महाशक्ति-नट्या सदा युङ् महेशो,
नटत्यञ्जसा ताण्डवं कर्तुकामः ।
त्रिनेत्रः पकारत्रयेणेषुवक्त्रः
सदेशादिना पञ्चकृत्यो नटेशः ।२।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्रधारः—अलमलमति विस्तरेण सम्प्रति श्रीबदरीनाथवेदवेदाङ्गमहाविद्यालयस्य वार्षिकोत्सवेऽस्मिन् तत्प्रधानाचार्य्येण काशीपण्डितसभाध्यक्षेण म.म. पण्डितराजेन व्याख्यान-वाग्मिना दर्शनकेशरिणा श्रीगोपालशास्त्रिणा संगृहीतं भट्टिमहाकाव्यसारं संवादात्मकमभिनिनीषूणामस्माकं नास्ति समययापनस्य प्रयोजनम्। (परितोवलोक्य) मारिष! मरिष! इतो झगित्यागम्यताम्।

मारिषः—(समक्षे समुपेत्य) कोऽनुयोगो भावस्य?

सूत्रधारः—(वंशस्थोपजातिच्छन्दसा गायति)

अये! त्वरायामपि भारते भवान्
स्वातन्त्र्यमाप्ते शिथिलो विलोक्यते।
द्रुतं स्वकीयाभिनयं नवं नवं
समारभेतेह बुधाः समुत्सुकाः।३।

मारिषः—(मालिनीच्छन्दसा गायन्)

नहि नहि वयमेवं क्वापि शौथिल्यभाजः
सम इह नटवर्गा व्यापृताः स्वीयकृत्ये।
उभयत उभयेऽन्तेवासिनावागतौ स्तो
निज-निज-नट-कृत्यं प्रारभेतेऽभिनेयम्।४।

(ततः प्रविशतः श्रीबदरीनाथवेदवेदाङ्गमहाविद्यालयस्य द्वावन्तेवासिनौ मदनमोहनडिमरि-विजयप्रसाददेवराडिनौ परस्परं संलपन्तौ)

प्रथमः—(इन्द्रवंशया गायति)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाब्दं सखे भट्टिकवि-प्रकल्पितं
संवादमात्रं विचितं समन्ततः ।
ग्रन्थात्मकं सम्प्रति लभ्यतेऽखिलं
काव्यं त्वया किं पठितं तदद्भुतम् ।५।

द्वितीयः—(वंशस्थोपजातिच्छन्दसा गायति)

कथं न भो मित्र! बुधाभिनन्दितं
गाण्डीव-पत्रे क्रमशो विनिर्गतम् ।
अवश्यमध्यायि मया प्रयत्नत-
स्तन्मञ्जुलं रामकथासुधाप्लुतम् ।६।

मदनः—तर्हि शुभाशसां शृणु—(वंशस्थोपजात्या गायति)

सुगुम्फितं सत्कविना निजेच्छया
संवादवृत्तं खलु यत्र तत्र यत् ।
गोपालशास्त्रि-प्रवरेण धीमता
तत्सञ्चितं तादृशमेव यत्नतः ।७।

तच्च—

स्वलंकृतं छात्रगणोपकारकं
काव्यामृतं व्याकरण-प्रशिक्षकम् ।
संवादमात्रं क्रमबद्धमादरात्
संक्षिप्त-मञ्जु प्रसरेन्महीतले ।८।

अन्यच्च—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वत्र देशे प्रतिवार्षिकोत्सवं
विद्यालयानामभिनेतुमुत्सुकाः
विद्यार्थिविज्ञा जनवृन्दशिक्षकं
स्वयोग्यतावर्द्धकमाश्रयन्त्विदम् ।९।

विजयः—अयि सखे ममापि शृणु तत्काव्यविषयकं मनोगतम्—
(स्रग्विणीछन्दसा नृत्यन् गायति)

परीक्षार्थिपाठ्ये निविष्टं सुपाठ्यं
महाभट्टिकाव्योद्धृतं काव्यमेतत् ।
लघु प्रस्फुटं छन्दसा सुप्रवृद्धं
तथा व्याकृतिज्ञान-कोशाधिगम्यम् ।१०।

अपिच—(वंशस्थोपजातिच्छन्दसा गायन्)

यो भट्टिकाव्यं सकलं न शक्नुया-
दध्येतुमेतत्स पठेत् समादरात् ।
ततोऽपि सारल्यमुपागतं स्फुटं
संवादरूपं कविनैव सञ्चितम् ।११।

(तत्रैव तृतीयश्छात्रः शम्भुसती अपटीक्षेपेण समेत्य वक्ति)

शम्भुः—अयि सखायौ ! 'नहीङ्गितज्ञोऽवसरेऽवसीदति' इति अवसर-प्राप्तं मदीयमपि पद्यद्वयं श्रुत्वैव विपरेतं युवाम् । तथाहि—
(स्रग्विणीछन्दसा गायन् कटिनर्तं नृत्यति)

स स्वतन्त्रः कविः शब्दशास्त्रानुगं
रामवृत्ताऽमृतप्लावितं साऽमरम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यच्चकारानुपाम'-प्रसादादिभी—
रावणान्ताभिधं काव्यमत्यद्भुतम् ।१२।

तथैव—

कान्तप्तद्विधर्म-चिनोशार्दिते
पारतन्त्र्य-प्रधाने युगेऽन्तर्हितम् ।
तस्य काव्यस्य सार-प्रकाशोऽधुना
भारते स्यात् स्वतन्त्रे शिवानुग्रहात् ।१३।

सखायौ ! सम्प्रति संस्कृतगाण्डीव-सम्पादकः श्रीरामबालकशास्त्री महोदयः श्रीबदरीनाथधामनि सस्वयंज्योतिरीश्वरस्य (सजोशीमठस्थस्य) श्रीबदरीनाथदेवस्य पुनःप्रतिष्ठापकानां जगद्गुरूणामादिशङ्कराचार्य्याणां सोपक्रममितिवृत्तं प्रस्तोतुमायातीति वयमपसरामः । (इतिनिर्गताः सर्वे जवनिकापातः । (ततः प्रविशति रामबालकशास्त्री अनुपानत्कपाद-सञ्चारी असौ-चिकवस्त्रधारी धृतप्राक्तनमहर्षिपरिच्छदः)

श्रीशास्त्री—अहो ! जगद्गुरुभिराद्यशङ्कराचार्यैश्चतुर्दिक्षु प्रतिष्ठापिताश्चत्वारो मठा यथा खण्डशो विभक्तस्य भारतस्याखण्डतां साधयन्ति न तथाऽन्यैः कैश्चिदपि कृताः कियन्तोऽपि प्रयत्ना इति प्रथमं तदीयमितिवृत्तमेव सोपक्रमं किञ्चित् संक्षिप्य प्रस्तूयते—(आकाशे हस्तोद्यमं स्रग्धरया गायति)

ज्योतिः—शृङ्गाद्रि-गोवर्द्धन-मठभुवि या द्वारकापीठभूमौ
पादान् स्थाप्य हृष्टा शिवविधुविधिभिर्धेनुरूपेण दृष्टा ।
यस्या गेहस्य खातं परिधिरपि हिमाद्र्यर्णवाभ्यां कृतौ स्त-
स्तामेतां गां भजामस्त्रिभुवन-जननीं भारताख्ये कुटीरे ।१४।

---

* टिप्पणी—(प्रह्वे वा) इति सूत्रस्योदाहरणं द्वयमपि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(शार्दूलविक्रीडितेन)

खेचारिष्वखिलेषु विश्रुततमा विश्वम्भराख्या धरा
तारैका सकलोत्तमेति विबुधा गायन्ति गीतं सदा ।
यत्र श्रेष्ठगिरिः प्रशान्तजलधेर्भूमध्यरत्नाकरम्
यावद्भूवलयप्रभुर्विजयते शक्त्या शिवेनाश्रितः ।१५।

भौगोलिकपरिचयः

तस्यैते विदिता हिमालयगिरेः शृङ्गेषु सर्वोन्नताः
केदारेश्वर-कामरूप-नयपाः कश्मीर कूर्माचलौ ।
नूनं पञ्च परेश्वरास्त्रिजगतामुद्धारणायाञ्जसा
भूमावत्र हिमालये स्ववसतिं सर्वात्मना चक्रिरे ।१६।

शम्भोर्मध्यम-कन्प-रुद्र-सहितैः केदारतुङ्गेश्वरै-
र्विष्णोः श्रीनरसिंह-योग-बदरी-वृद्धादिकूटोपलैः ।
यस्य ज्योतिरधीश आकृतिकरो वक्षःस्थले राजते
पञ्चस्वेकतमोऽयमद्रिशिखरः केदारखण्डाभिधः ।१७।

पारेऽसंख्यमितो लसन्ति परितो ब्रह्माण्डभाण्डानि च
प्रत्यण्डं रविचन्द्र-तारकयुता विश्वम्भरा वर्तते ।
सर्वत्रैव हिमालये प्रतिभुवं केदारखण्डे सदा
ज्योतिर्धाम विराजते सुमनसां पन्थानमालोकयत् ।१८।

कार्यपरिचयः

प्रस्थानत्रयभाष्यकारभगवान् कन्याकुमारी-स्थलम्
स्वेनालंकृतवान् पुरा शिवगुरोर्गेहं च यो जन्मना ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोऽयं शूलधरावतार-भगवत्पादाभिधः शङ्करो
ज्योतिर्धाम्नि जगद्गुरुत्वममलं स्वञ्चाप्यपश्यन्मुदा ।१९।

पूर्वं ज्योतिरधीश्वरं स भगवाञ्छ्रीशङ्करोऽपूजयद्
देशे स्थापितवांस्ततो मठगणान् गोरूपयन्त्रात्मके ।
सर्वत्रैव महानुशासनपरान् संन्यासिनो दीक्षितान्
कृत्वा वर्गचतुष्टयस्य विषये शिक्षालयाश्चालिताः ।२०।

दिव्यां लोकविभूतये सुविदितां विद्यां त्रिवर्गात्मिकां
मोक्षाख्यं खलु वर्गमन्त्यमपि तं वैराग्यपूर्णात्मने ।
निर्दिश्यात्र पुनर्भविष्णु-जनतोद्धाराय मार्गं दिशन्
केदारेश्वर-सन्निधौ पुनरभूल्लीनः परे ब्रह्मणि ।२१।

परम्परापरिचयः

विष्णु-ब्रह्म-वशिष्ठ-शक्ति-विदिताऽम्नायैश्च संबोधिता
पूर्वाद्यैः शुकगौडपाद-भगवत्पादादिभिः पूजिता ।
चाणक्याच्चरितार्थिता कलियुगे श्रीत्रोटकाद् द्योतिता
सेयं पुण्यपरम्परा भुवि नृणां भूयात्सदा भूतये ।२२।

प्रस्थानत्रयभाष्य-पुञ्जकमले दृष्टा विमुक्तात्मभिः
कौटिल्ये नयनेऽथ भाङ्कथने धर्मार्थयुक्तात्मभिः ।
व्यक्ता संस्कृतये विलक्षणकृतौ वाल्मीकि-कानीनयोः
आयुर्वेद-परम्परा च चरकाद्यैः सुश्रुतैर्मानिता ॥२३॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नगरे मठे च विहंगमा दृष्टिः

ज्योतिर्भूमिरियं हि योजनमिता प्राच्यामपर्णांतिका
सत्राजिद्वरदा यमेऽथ वरुणे सा पर्णखर्डेश्वरी ।
साक्षाज्जह्नुसुताऽत्र किन्नरदिशि व्याप्ता च नन्दात्मना
पूर्णाम्बा जननी समस्तधरणीमाक्रम्य सा दृश्यते ॥२४॥

(दत्तताली वादं सुरागगायं गायति शिखरिणीछन्दसा)

मठे कुर्विस्तीर्णा विलसति कुबेरस्य ककुभि
प्रसिद्धो वृक्षोऽसौ महतुत इति प्राक्त -पृथुः ।
शिवो ज्योतिर्धामेश्वर इति समूले निविशते
दिशि प्राच्यामास्ते विपुलतर आचार्य-निलयः ॥२५॥

तथैव—

विशाला रिक्ताभूर्यमदिशि ततो वारुणदिश
प्रसिद्धे अब्धारे क्वापि स लक्ष्मीर्विजयते ।
प्रदेशं मध्यं साऽप्यभिवसतिपूर्णा भगवती
मठस्थः सक्षेपात्परिधिरपि सम्यग्निगदितः ॥२६॥

साम्प्रतं श्री बदरीनाथवेदवेदाङ्ग-महाविद्यालयस्य[1] भाविप्रधानाचार्यः श्रीमदिन्दु-प्रकाशोपाध्यायो भट्टिमहाकाव्यविवरणं विस्तृतं प्रस्तोतुमागच्छतीत्यहमपसरामि । (इति विनिर्गत) (ततः प्रविशति नयपालिपण्डितवेशे श्रीमदिन्दुप्रकाशमहोदयः) (उपजातीन्द्रवज्रोपेन्द्रवज्रादिच्छन्दोभिर्यथाप्राप्तं गायन् उत्तानहस्तम् गगनाभिमुखम्)

❀ टिप्पणी—१ ग्रन्थनिर्माणकालिकमिद सम्प्रति तु अयमेव प्रधानाचार्योऽस्ति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्य्यः

काव्यप्रिया व्याकरणप्रिया ये
छात्राः परीक्षोत्तरणे प्रवृत्ताः ।
बुद्धि-प्रकर्षाय विविच्य तेषां
पार्श्वेऽर्पये भट्टिकवेर्विमर्शम् ॥२७॥

स पाणिनेर्भक्त-वरो बुधाग्रणी-
स्तदष्टकाधारक—भट्टि-काव्य-कृत् ।
शाब्दं समस्तं निबबन्ध लक्षणं
यन्मध्यमायां विनिवेशितं बुधैः ॥२८॥

तत्काव्य-सम्बद्धमिदं सुवृत्तम्
मर्मावबोधं बुधवृन्दवन्द्यम् ।
अभ्यस्य सर्वेऽवतरन्तु शीघ्रं
छात्राः परीक्षाजलधिं प्रहृष्टाः ॥२९॥

(शार्दुलविक्रीडितेन)

छात्राणां क्रियते सुपाठन-कृते हृद्या समालोचना
श्रीमद्भट्टिकवेः सुशाब्दिकमणेः काव्यस्य मर्म-प्रदा ।
यत्पाठेन भवन्तु प्रौढसुधियश्छात्राः परीक्षाप्रियाः
काव्योत्कर्षविदोऽथ शाब्दिक-वरास्तद्ग्रन्थ-निष्णातकाः॥३०

(प्राचीन-कवि-कृता भट्टि-काव्य-प्रशंसा (अनुष्टुभा)

बहुभिर्बहुधा गीता प्रशंसा भट्टिकाव्यगा
तामिहोपनिबध्नामि प्रकीर्णैः पद्य-संग्रहैः ।३१

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(आर्यया)

यद्यपि बहु नाधीषे तथापि पठ पुत्र त्वं व्याकरणम्
स्वजनः श्वजनो माभूत्सकलं शकलं सकृच्छकृच्च ।३२

(अनुष्टुभा)

अष्टाध्यायी जगन्माताऽमरकोशो जगत्पिता
भट्टिकाव्यं गणेशश्च त्रयीयं सुखदाऽस्तु वः ॥३३

व्याकृत्या कोशवृत्ताभ्यामलंकृत्या रसेन च
राजनीत्यान्वितं भव्यं भट्टिकाव्यं विराजते ॥३४

व्याकृतेश्चषके पेयं रामराजकथाऽमृतम्
कोशच्छन्दःप्रसादादि-गुण-राज-नयादिभृत् ॥ ३५

(इन्द्रवंशया)

न कापि टीकेह तथोपलभ्यते या पूरयेत् पाठक-हृत्पिपासिकाम्
विहाय तां मर्मविमर्शिकामिधां महाकवेः काव्यदिशा विनिर्मिताम् ३६

(भट्टिकाव्ये व्याकरण दृष्टिः) (वंशस्थेनैव)

प्रकीर्णकाण्डं शरसर्गटात् पुर-
स्ततोऽधिकारो* नवमान्तमेधते ।
प्रसन्नकाण्डं दशमात् त्रयोदशे
चतुर्दशादन्तमितं तिङन्तकम् ॥३७

---

*टिप्पणी—पञ्चमसर्गीय-सप्तनवतितम-९७ पद्यात् टप्रत्ययस्याधिकारः 'चरेष्टः ३।२।१६' इति सूत्रविहितः प्रक्रमते।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(परीक्षोपयोगिनी समालोचना (वंशस्थवृत्तेन)

अगन्त-शब्दाः प्रथमेऽत्र सर्गके,
प्रकीर्णकाण्डं शरसर्गटात्पुरः ।
वृत्तं समं सन्धि-समास-सम्भृतं,
लुङ् लिट् सलङ् लङ्लृङिहास्ति लोडपि ॥३८

आद्ये हि पद्ये रुचिरेति वृत्तकं,
सर्वत्र सर्गेऽप्युप-जातिरेधते ।
पुत्रेष्टि-यागेन चतुःसुतोद्भवो—
ज्ञेयस्तथा गाधिसुतागमोऽन्ततः ॥३९

(उपजातिवृत्तेन)

द्वितीयसर्गेऽपि हलन्त शब्दाः,
शरत्समृद्ध्या लिङुपैति पूर्वम् ।
मारीच-राम-प्रबल-प्रवादो,
लुङ्-लिङ्-लटः लोऽथ सहैव लोटा ॥४०

तृतीय-सर्गेऽपि कृदन्त-शब्दा,
रामाऽभिषेकेऽस्ति च विघ्न-पातः
व एव लो राघव—नीति- वाक्यं,
निवर्तयित्रेऽथ कनीयसेऽस्ति ॥४१

(वंशस्थच्छन्दसा)

चतुर्थ-सर्गे मतुबादि-प्रत्ययाः
स्त्रीलिङ्गशब्दा मुनि-रामवार्तया ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लश्चापि षट् ते हि लुटाऽधिकेन वा-
ऽप्यनुष्टुभा शूर्पणखागमस्तथा ॥४२

(शालिनीवृत्तेन)

पूर्वं सर्गे पञ्चमे कीर्णकाण्डं,
दूरं यात्याषण्णवत्यन्तपद्यम् ।
स्त्रीलिङ्गाः कृत्तद्धितान्ताश्च शब्दा
लङ्केशायोद्योतनं तद्भगिन्याः ॥४३

(वंशस्थेन)

लङ्केश-मारीच-पराभिसन्धितः
सीताऽपहारोऽपि जटायु-रोधनम् ।
सप्ताङ्क-(९७) पद्यादधिकारकाण्डगौ
टामाधिकाराविह पञ्चमे मतौ ॥४४

ततः क्रमेणैव दुहादि-सिच्-श्नमः,
कृत्याः कृतोऽन्येऽप्यधिकारप्रत्ययाः ।
षष्ठेऽत्र सर्गेऽपि प्रकीर्ण-मध्यगा
ये ण्वुल्तृजाद्याः कृत एव ते समे ॥४५

राम-प्रलापोऽथ जटायु सङ्गम-,
स्ततः शबर्यादि-समागमस्तथा ।
सुग्रीव-सख्येन च वालि-पातनं,
सर्गस्य षष्ठस्य समाप्तिरुह्यताम् ॥४६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तच्छील-तद्धर्म-प्रभृत्युपाधिभृत्—,
कृत्प्रत्यया ये पुरतोऽत्र सप्तमे ।
घञादि सम्पातिसमागमावधिम्
ङित् कित् ततोऽन्तं समुपैति सप्तमः ॥४७

(इन्द्रवज्रावृत्तेन)

वर्षागमो वानरराट्-प्रमादः,
सौमित्रि-कोपेण तदुद्यमश्च ।
सीतागवेषा समयातिपातः,
सम्पाति-वाक्याज्जलधेस्ततीर्षा ॥४८

(उपजात्या)

ततोऽष्टमेऽप्यात्मपदं परस्मैपदं ततः कारक इत्यवेहि ।
कर्मप्रवक्तृत्व-विभक्तिकार्यं, सर्गेऽत्र बोध्या विषयाः क्रमेण ॥४९

समुद्रमुल्लङ्घ्य मरुत्सुतस्य, लङ्काप्रवेशोऽथ गृहेष्वटाट्या ।
सीतोपलब्ध्यात्मनिवेदनान्ते सन्देशमादाय वनाद्यभङ्गः ॥५०

ततश्च सिज्वृद्ध्यधिकार आदावनिट् ततश्चेणनवमेऽपि सर्गे ।
तत्रैव सत्वं त्वथ षत्वणत्वे इतोऽधिकारौ चरमं प्रकीर्णम् ॥५१

युद्धं चपाटैर्हनुमद्दशास्योपाख्यानमन्ते कपि-पुच्छदाहः ।
काण्डश्च सर्गाद्दशमादुपैति त्रयोदशान्तं किल सुप्रसन्नः ॥५२

प्रकीर्णता व्याकृतिगा च काण्डेऽलङ्कारभेदा दशमेऽत्र सर्गे ।
एकादशे सर्ग उपेत्य लङ्काप्रभातमाख्याति कविः प्रसादात् ॥५३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

समागतो द्वादश-सर्गमध्ये विभीषणो वक्ति सुराजनीतिम् ।
त्रयोदशे रामबल-प्रवृत्तौ भाषासमाऽलंकृतिरस्ति सर्गे ॥५४

अन्ते समायाति तिङन्त-काण्डं चतुर्दशात्काव्यसमाप्तिगं तत् ।
लिटो विलासोऽस्ति चतुर्दशेऽत्र सीता-विमोहोऽपि च रामसूर्ना॥५५

युद्धे प्रहस्तादिबलाधिपानां दृढोद्यमश्चेन्द्रजितस्तथैव ।
रामादिबन्धोऽपि च नागपाशैः सीताविलापोऽपि च पुष्पकेऽस्ति५६

तस्याः प्रबोधस्त्रिजटाप्रयत्नात् पाशाद्विमुक्तिर्गरुडस्मृतेश्च ।
प्रहस्त-मृत्युः कपि-नील-शैलाश्चतुर्दशस्यास्य समाप्तिरित्थम् ॥५७

विभाति लुङ् पञ्चदशेऽथ सर्गे यत्नेन जागर्ति स कुम्भकर्णः ।
प्रयाति मृत्युं सुचिरं प्रयुध्याप्यन्तेऽथ वै रामशरप्रहारात् ॥५८

ततो दशास्यो विलपत्यजस्रं सुतान्तदीयाः प्रधने प्रयान्ति ।
तेषां वधे तत्सुतमेघनादो व्यामूमुहद् ब्रह्मवरेण सर्वान् ॥५९

हनूमदाऽनीत-महौषधीभिः सञ्जीविनीभिः कपयोऽप्यजीवन् ।
सर्गोऽन्तमैत् कुम्भ-कुम्भ-नाशाद् रात्रिञ्चराणां समतायि शोकः ६०

लृटो विलासोऽस्ति च षोडशेऽस्मिन् मुहुर्मुहू रोदिति राक्षसेन्द्रः ।
तत्रागतस्येन्द्रजितो दृढोक्तेरुत्साहमासाद्य भवत्यशोकः ॥६१

विभाति लङ् सप्तदशेऽथ सर्गे स रावणिर्याति रणे प्रयोद्धुम् ।
मायामयीं कृन्तति तत्र सीतां हनूमदादीन् व्यथितान् करोति ६२

विभीषणस्यैव विबोधनेन सर्वेऽभवंस्तथ्यविदः प्रहृष्टाः ।
ततोऽप्यगुस्तत्र निकुम्भिलायां विभीषण-प्रेरणयैव सर्वे ॥६३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्राभिचारेष्टिमुपाजिहीर्षुं विघ्नेच्छया रावणिमाह्वयन्त ।
उद्भाव्य विघ्नं तमुपाजघान स लक्ष्मणो रावणि मात्मशक्त्या ६४

सोऽपि ज्वलद्रावण-शक्ति-विद्धो मूर्च्छां गतः शैलमहौषधीभिः ।
जीवत्यहो रावण एति मृत्युं रामेण संयुध्य तदीय-बाणात् ॥ ५

इन्द्रार्पितादेवबलाभिपन्नात् सर्गोऽन्तमैद्रामबलप्रहर्षात् ।
अष्टादशोऽप्यस्ति लटो विलासो विभीषणो रोदिति बन्धुशोकात् ६६

विधिर्लिङाशीस्तत ऊनविंशे रामाज्ञया रावण-देह-दाहः ।
त्यागोद्यतं राममुवाच सीता विंशेऽपि सर्गे बहुलोड्विलासम् ६७

अग्न्यादि-देवोक्तिरथैकविंशे सर्गेऽपि सीताग्नि-परीक्षया लृङ् ।
द्वाविंशसर्गेऽस्ति लुटो विलासो वक्तीह रामो हनुमन्तमादौ॥६८

(वंशस्थेन)

कपीश-लंकेश्वरतुष्टिदस्ततः स-सीत-रामोऽप्युपविश्य पुष्पके ।
त्वरायमाणो भरतप्रतीक्षया स्वराजधानी-गमने मनो दधे ॥६९

(शालिन्या)

याने तस्मिञ्जानकीं दिव्य-रूपां
देशान् सर्वान् दर्शयन् रामचन्द्रः ।
पौरैर्मृत्यैर्मन्त्रिभिर्हर्षभृद्भिः
स्वं सम्प्राप्तं भ्रातरं स्वासरुञ्ज ॥७०

(द्रुतविलम्बितेन गायन्)

अथ स सम्भ्रमपौरजनावृतो
भरत-पाणि-धृतोज्ज्वल-चामरः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुजनद्विजवन्द्यभिनन्दितः
प्रविशति स्म पुरं रघुनन्दनः ॥७१

(सुन्दरीछन्दसा)

प्रविधाय धृतिं परां जनानां
युवराजं भरतं ततोऽभिषिच्य ।
जघटे तुरगाध्वरेण यष्टुं
कृत-सम्भार-विधिः पतिः प्रजानाम् ॥७२

[अथाधिकार-काण्डीय प्रत्यय-व्यवस्था] (अनुष्टुभा गायन्)

ज्ञायतां भांडूकाख्येऽत्र प्रकीर्णः काण्ड आदितः
क्रमात् पञ्चमसर्गस्य षडङ्कमित-९६ पद्यगः ॥ ७३

ततः ९७ सप्तांकपद्याट् टाऽधिकारोऽग्रे समेधते
१०० शतावधि, ततो वह्निशून्यैकेन १०३ प्रकीर्णकम् ७४

१०४ चतुःखैकमितात् पद्यात् षष्ठसर्गे चतुर्मितम्
आप्नुयैति प्रकीर्णान्ते दुहादिर्दशमावधिः ॥७५

प्रकीर्णे पञ्च पद्यानि सापवादोऽस्ति सिच् ततः
षोडशात्यञ्चत्रिंशान्तं स एव हि प्रसर्पति ॥७६

पञ्चत्रिंशत एकोनचत्वारिंशे श्रमो विधिः
चत्वारिंशत्तमात् पद्यात् पञ्चपद्यानि कीर्णकम् ।
षट्चत्वारिंशतः कृत्याः प्रत्ययाः सप्तषष्टिगाः
पुनः प्रकीर्णं विज्ञेयं तत्र श्लोकत्रयावधि ॥७७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७१ एक-सप्ततिगात् पद्याद्रहितोपपदाः कृतः
तृज्ण्वुलाद्या मताः सर्वे षडशीतितमान्तगाः ।७८

८७ सप्ताशीतितमात् पद्यात् सर्वे सोपपदाः कृतः
कर्मण्यण् खश् खजाद्यास्ते ण्युन् क्विप् क्विन् क्वनिवादयः७९

प्रत्यया दर्शिताः सर्वे षट्त्र्येकमित–१३६ पद्यगाः
सप्तत्र्येकमितात् १३७ पद्यान् निष्ठादि-शतृ-सम्पुटाः ।८०

प्रत्ययाः कथिताः सन्ति सर्गेऽस्मिन् षष्ठसंज्ञके
ततः सप्तमसर्गेऽपि प्रारम्भात् सप्तविंशतौ ॥८१

पद्येषु सन्ति ते सर्वे प्रत्यया स्तृन्मुखाः कृतः
आकेस्तच्छील-तद्धर्म-तत्साध्वाद्यर्थवाचकाः ॥८२

ततो निरधिकारः कृत् त्वष्टाविंशतिपद्यतः
त्रयस्त्रिंशावधिर्ज्ञेयः सर्गेऽस्मिन्नेव सप्तमे ॥८३

चतुस्त्रिंशात्ततो ज्ञेया भावेऽकर्तरि कारके
घञादि-प्रत्ययाः सप्तषष्टि-६७ पद्यावधि क्रमात् ॥८४

अष्टषष्टितमात् ६८ पद्यात् 'स्त्रियां क्तिन्' प्रमुखास्तथा
सप्त-सप्तति-पद्यान्तं यान्तीमे प्रत्ययाः समे ॥८५

अष्टासप्ततगात् पद्याद् बहुलं कृन्नपुंसके
'भावे क्त' इत्यतश्चातो 'युजन्त' उपयुज्यते ॥-६

तत्रैकनवतेः पद्यात् ङित्-कितावधिकारकौ
सर्गान्तमेतोऽब्धेस्तीरं कपयोऽगुस्तितीर्षया ॥८७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्गाष्टमादितो ज्ञेय आत्मने-पद-तङ्विधिः
नवाब्धि-मित-पद्यान्तम् परस्मैपदकं ततः ॥८८
तच्चाप्यग्रे क्रमाद् याति तूनसप्ततिपद्यभाक्
ततोऽग्रे कारकं ज्ञेयं ८४ वेदाशीतितमावधि ॥८९
कर्म-प्रवचनीयं तत् पञ्चाशीतितमाच्चलेत्
त्रयोनवति-पद्यान्तं प्रयातीति विबुध्यताम् ॥९०
ततोऽनभिहितेसूत्राऽधिकारः सर्गमाश्नुते
लङ्काप्रवेशोऽप्यन्वेषा सीता-सन्दर्शनादिकम् ॥९१
अकीर्णं नवमे सर्गे सप्तपद्यावधि स्मृतम्
तत्रैव प्रथमे पद्ये सिज्वृद्धिश्च तथाऽष्टमात् ॥९२
सैकादशान्तमन्वेति ततोऽनिड्द्वादशाच्चलेत्
द्वाविंशतितमं यावत्तत इड्दूरमेधते ॥९३
सप्तपञ्चाशपद्यान्तं सोऽधिकारस्ततोऽग्रतः
षट्षष्टितमपद्यान्तं पोऽधिकारगतिस्ततः ॥९४
एकनवतिपद्यान्तं (९१) ततो णोऽधिकृतिर्मता
नवखैकमितं १०९ पद्यं यावदग्रे प्रकीर्णकम् ॥९५
सीता-हनुमतोर्वार्ताऽप्यशोक-वन-भञ्जनम्
लङ्केशहनुमद्वार्ता नवमस्य समाप्तितः ॥९६

(उपजात्या)

ततः प्रसन्नः कविताविलासस्त्रयोदशान्तं दशमात्प्रसर्पन्
चतुर्दशादेति तिङन्तकाण्डो द्वाविंश-सर्गान्तमजस्रमेति

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकैक-सर्गं नवलां विलासो लिटः समारभ्य लुङन्तमास्ते
अहो महाकाव्य मिदं समृद्धं द्वाविंश-सर्गान्तमधीष्व धीमन्!

भट्टेर्मया पाणिनिभक्तिभाजो महाकवेः शाब्दिक-भृङ्गवस्य
छात्रोपयोगि प्रसमीक्ष्य काव्यं सम्यक् समालोचितमादरेण।

(वसन्ततिलकया गायन् समापयति) (९७, ९८, ९९)

छात्रा अनेन विधिना मृदु भट्टिकाव्यम्
पाणिन्युपज्ञमपि चाष्टकमादधानाः।

सम्यक् प्रशील्य पदबोधजवाक्यबोधाद्
भूत्वाऽथ शाब्दिक-वरा ददतां परीक्षाम्॥ इत्योम्॥१००

समयस्तु भवतां भूयान् गृहीतो मया किन्तु कार्य्यमपि बहु साधितम्। इति जानन्तु। इदानीं वार्षिकोत्सवावसरेऽस्मिन् आचार्य्याणाम् अन्तेवासिनाम् अतिप्रियो भट्टिमहाकाव्यसारस्य अभिनयः प्रारभते इत्यहम् अपसरामि। (इतो विनिर्गत आचार्यः)

विविध-विबुध-संवादः

(द्वाविंश-सर्गगः रहस्यात्मकः)

(ज्योतिर्मठेजोशीमठे) श्रीबदरीनाथवेदवेदाङ्गमहाविद्यालयाध्यापकास्त्रय आचार्याः शिक्षापरिषदि आचार्यवेशे समुपविष्टास्तत्र प्रथमो ज्योतिर्विद् पं० श्रीभगतरामथपलियालो द्वितीयो नैयायिकः पं० श्रीभैरवनाथपाण्डेयः तृतीयः पं० श्रीजयदत्तशास्त्री उपैतौ वैयाकरणः। प्रसङ्गतस्त्रयोऽपीमे भट्टिमहाकाव्य-स्वरूपपरीक्षणे व्यापृताः सन्ति। तत्र प्रथमं ज्योतिर्विद् ब्रवीति।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्योतिर्विद्—(भुजङ्ग प्रयातेन)

सखायौ ! मयाश्रावि भट्टिः कविर्यः
शिवादेशतो यच्च-निर्देशमाप्य ।
व्यधाद् यन्महाकाव्यमत्युत्तमन्तत्
प्रदीप्तं समस्तेऽधुना भारतेऽस्मिन् ॥१०१

अतश्च वाराणसेय-संस्कृत-विश्वविद्यालयीय-परीक्षायां प्रारम्भत एव मध्यम- परीक्षा-व्याकरण-पत्रे विकल्प-पाठ्यरूपतो हि तन्निवेशितमस्ति। मदीयाः छात्रास्तु व्याकरण-पाठ्यस्थाने तदेव महाकाव्यं सर्वदा पठन्ति प्रथम श्रेण्यां चोत्तरन्ति।

नैयायिकः—अहो ! तन्महाकाव्यं तूत्तमतममस्ति स्वयं महाकविरसौ द्वाविंशे सर्गे काव्यावसाने तन्महत्वं निबध्नाति। शृण्वन्तु—(पुष्पिताग्रया)।

इदमधिगत-मुक्ति-मार्ग-चित्रं
विवदिषतां वदतां च सन्निबन्धात् ।
जनयति विजयं सदा जनानां
युधि सुसमाहित मैश्वरं यथाऽस्त्रम् ॥३

वाराणसेय-सं०-विश्व-विद्यालयीय-परीक्षायामेव नहि केवलं किन्तु सर्वत्रैव वङ्गः-विहारादिप्रान्तीय-संस्कृत-मध्यम-परीक्षायां व्याकरण-पाठ्यतयैव तत्पाठ्यते।

वैयाकरणः—अथ किम्, तन्महाकाव्यं पाणिनीयाष्टकाधारमेव निर्मितमिति स्वयं महाकविर्निर्दिशति तथाहि—(अनुष्टुभा)

दीपतुल्यः प्रबन्धोऽयं शब्दलक्षण -चक्षुषाम् ।
हस्तामर्ष इवान्धानां भवेद् व्याकरणादृते ॥३३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपिच—व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् ।
हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया ॥३४

अत एवास्य व्याख्यां सर्वेऽपि प्रान्तीया वैयाकरणा विद्वांसः स्व-स्व-व्याकरणानुसारं पुरा कृतवन्तः सन्ति। वङ्गदेशे कलाप-सुपद्म-संक्षिप्तसार-मुग्धबोधादिव्याकरणदिशा भट्टिकाव्यव्याख्यानम् उत्तर-प्रान्ते जयमङ्गल-मल्लीनाथ-दर्शनकेशरि-प्रभृतिविरचितं व्याख्यानं पाणिनीयाष्टकदिशा समुपलभ्यते।

ज्योतिर्विद्—अयि भोः पुस्तकपाठे देशकालज्ञानमावश्यकं भवतीति तदपि निर्दिष्टं महाकविना—(प्रहर्षिणीछन्दसा)

काव्यमिदं विहितं मया वलभ्यां
श्रीधरसेन-नरेन्द्र-पालितायाम् ।
कीर्तिरतो भवतान्नृपस्य तस्य
प्रेमकरः क्षितिपो यतः प्रजानाम् ॥३५ इति

नैयायिकः—अयि भो इदं सर्वन्तु महाकवेस्तस्य वाचिकमेव महत्वं गीतमस्माभिः तस्य ध्वनितमपि स्मरन्तु। तथाहि—(स्रग्विणीछन्दसा)

राजनीतिः समाजीयरीतिस्ततो—
रामवृत्ताऽमृतं हृद्यमापीयताम् ।
पाणिनीयाष्टकं कोशकाव्यच्छटा—
ऽलङ्कृति र्व्याङ्ग्यमर्यादयाऽप्युह्यताम् ॥१

(तत्रापटीक्षेपेण प्रविश्य)

दक्षाराज्ञी—अये विद्वांसो भवन्तस्तु वाच्यम् तथा व्यङ्ग्यं रहस्यं भट्टि-महाकवे दर्शयन्ति। अहन्तु तन्महाकाव्य-विषयकं स्वानुभवं विवृणोमि शृण्वन्तु—(शालिन्या गायन्ती)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हस्ते धृत्वा पाणिनीयाष्टकं तच्—
छात्रैः सर्वैर्बुध्यतां भट्टिकाव्यम् ।
काव्यं नेदं काव्यबुद्ध्यैव बोध्यं
व्याकृत्यालङ्कार-कोशादिनेद्धम् ॥२

अपि च—सर्वे बाला बालिकाश्चैव सर्वाः
स्त्रीयाऽचार्याऽदेशमासाद्य हृष्टाः ।
संवादानां नाट्यवेशेऽभिनीतिं
कारं कारं ङ्गर गान्रञ्जयामः ॥३

इति संक्षेपेणैवाहमुक्त्वा विरमामि । पश्यन्तु-कियन्तो महाविद्यालयीया विद्वांसः साम्प्रतं वार्षिकोत्सवावसरे संवादाभिनयं कर्तुं भूमिकाभृतस्तिष्ठन्तीति भवद्भिः सहैवाहमपि अपसरामि । (इति निर्गताः सर्वे) [जवनिका पातः]

इति भट्टिमहाकाव्यसारे प्रथमः सर्गः समाप्तः

द्वितीयः सर्गः

(श्रीबदरीनाथ-वेदवेदाङ्गमहाविद्यालयस्य वार्षिकोत्सवावसरे रङ्गमञ्चमभितः सर्वे सभ्याः समुपविष्टा नेपथ्याभिमुखा भाविनमभिनयं प्रतीक्षन्ते । तत्र प्रविशतस्तद्विद्यालयसाहित्याऽध्यापकौ श्रीदेवीप्रसाद-पन्त-श्रीलक्ष्मीप्रसाद-डोभालौ साहित्याचार्यौ परस्परं संलपन्तौ प्रथमं पन्तो ब्रवीति)—

पन्तः—अये डोभाल ! अस्मिन् वार्षिकोत्सवे श्रीगुरुपादैः प्रणीतं ग्रन्थरत्नं संक्षिप्तं संवाद-सारम् भट्टिमहाकाव्याद् विचित मभिनेतव्यमस्ति तत्प्रतिपात्रमाधीयतां यत्नः

डोभालः—ओम् ओम् भवदाज्ञया भूमिकाभृतः सर्वेऽपि अभिनेतृवर्गाः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वत एव सन्नद्धाः सन्ति। आवां तु नृपदशरथ-गाधिसुत-विश्वामित्रभूमिकां ग्रहीष्याव इति चलामो नेपथ्ये। (विनिर्गतौ द्वावपि वेशभूषां ग्रहीतुम्) (जवनिकापातः)

(ततो भारतसम्राट् राजा दशरथः राजपरिच्छदे, विश्वामित्रो महर्षिः तपस्विवेशे रङ्गमञ्चे चङ्क्रम्यमाणौ दृश्येते)

दशरथः—(राजपरिच्छदे) अये महामुने! साकेतसम्राट् अयं दशरथः तपोनिधिं महर्षिमत्रभवन्तम् अभिवादयते। केन निमित्तेन अलङ्कृतोऽयं साकेत-भूभागः? अपि च—

ऐषीः पुनर्जन्मजयाय यत्त्वं
रूपादिबोधान्न्यवृतच्च यत्ते।
तत्त्वान्यबुद्धाः प्रतनूनि येन
ध्यानं मुने! तच्छिवमस्ति कच्चित् ॥१८

विश्वामित्रः—(तपस्विवेशे) अयि सर्वसम्पत्सम्पन्नमहाराज! विजयस्व। कथं सूर्य्ये तपति तमिस्रोद्गमः स्यात्। श्रूयताम् भूतार्थम्—

साकेतसम्राट् कुशलं समाधे—
विघ्नन्ति रक्षांसि वने क्रतूंश्च।
तानि द्विषद्वीर्यनिराकरिष्णु—
स्तृणेद्धु रामः सह लक्ष्मणेन ॥१९

अपि च—

मया त्वमाप्याः शरणं भयेषु वयं त्वयाप्याप्स्महि धर्मवृद्ध्यै
क्षात्रं द्विजत्वं च परस्परार्थे शङ्कां कृथा मा प्रहिणु स्वसूनुम् ॥२१

अन्यच्च—

घानिष्यते तेन महान्विपक्षः स्थायिष्यते येन रणे पुरस्तात्।
मा मां महात्मन्! परिभूरयोग्येन मद्विधो न्यस्यति भारमग्र्यम् ।२२

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशरथः—(सभाऽभिमुखो भवन्) यदि रामं मुनये ददामि तर्हि कथं तद्वियोगं सहिष्ये यदि न ददामि तर्हि मुनेराज्ञोल्लंघिता स्यादिति उभयतः पाशरज्जौ एष मे निश्चयः। मुनेरभिमुखो भवन्) अयि तपोधनाग्रणीर्महाविज्ञानराशे !

क्रुध्यन्कुलं धक्ष्यति विप्रवह्नि र्यास्यन्सुतस्तप्स्यति मां रुमन्युम् ।
इत्थं विचिन्त्यैव विनिश्चयो मे गृहाण रामं सह लक्ष्मणेन ॥२३

विश्वामित्रः—साधु साधु भारतसम्राट साधु विहितं भवता

साधु प्रभो ! सूर्यकुलावतंस ! तवानुरूपं किल कार्य्यमेतत् ।
यथा प्रसन्नोऽर्हामतः प्रतिष्ठे तथा त्वमप्येष्यास भव्यभद्रम् ॥२४

अपरञ्च—

अतिप्रसन्नस्तव राजधान्याः प्रातश्चलिष्याम्यहमाश्रमाय ।
मां पृष्ठतः प्रेष्यति रामभद्रः सध्रयङ् रतः श्रेयसि लक्ष्मणश्च ॥२५

अन्यच्च—

अस्माद्भवेत् सूर्यकुलावतंस ! तवापि कीर्तिर्विततात्रिलोक्याम् ।
रामस्य भूयादनुजान्वितस्य श्वः श्रेयः राक्षसजित्वरस्य ॥२६

(ततो रामलक्ष्मणौ राजब्रह्मचारिवेशे प्रविशतः)

रामलक्ष्मणौ—[1]

पितर्व्रजावो मुनिना सहावां चिन्ता न कार्या विषयेत्वया नौ ।
सम्पाद्य शीघ्रं मुनियज्ञसिद्धिं वन्दावहे ते चरणौ स्ववन्दूयौ ॥२७

(निर्गताः सर्वे)

---

(१) प्रकीर्णकाण्डसंवादेषु व्याकरणोदाहरणं स्वयमूह्यम् तत्र तिङन्तकृदन्ताः समासतद्धितगाः सर्वेऽपि प्रयोगाः साध्याः !

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[तपोधन-रामलक्ष्मणानाम् संवादः द्वितीयः]

(द्वितीयसर्गः)

(एकतस्तपोधनाः स्ववेशे अपरतश्च रामलक्ष्मणौ राजब्रह्मचारिवेशे रङ्गमञ्चे प्रविशन्ति)

तपोधनाः—(पुष्पाणि विकीर्य तयोरुपरि)—अये रामलक्ष्मणौ शृणुतम् अस्माकं तथ्यवचांसि—

दैत्याभिभूतस्य युवामवोढं मग्नस्य वोर्भिर्भुवनस्य भारम् ।
हवींषि सम्प्रत्यपि रक्षतं वां वयं समे सम्मिलिता वदामः ।२७

महीयमानाऽतितरां युवाभ्यां सुरध्वरे धस्मरजित्वराभ्याम् ।
दिवोऽपि वज्रायुधभूषणाया हिणोयते वीरवती न भूमिः ॥३८

अपि च—

बलिर्बबन्धे जलधिर्ममन्थे जह्रेऽमृतं दैत्यकुलं बिजिग्ये ।
कल्पान्तदुःस्था वसुधा तथोहे येनैष भारोऽतिगुरुर्न तस्य ॥३९

किञ्च राम ! तव तु सर्वयुगप्रसिद्धेयं प्रतिज्ञा विश्वविदितास्ति—

गोविप्रधर्माध्वररक्षणार्थं युगे युगे त्वं तनुमादधासि ।
इमां प्रतिज्ञां[1] महितां त्वदीयां विभो वयं विश्वजनीनवृत्तिम् ॥४०

रामः—(राजब्रह्मचारिवेषे एव)

ब्रूमो वयं क्षत्रकुलप्रसूता यथेप्सितं प्रस्तुतकर्मधर्म्यम् ।
तपोमरुद्भिर्भवतां शराग्निः सन्धुक्ष्यतां नोऽरिसमिन्धनेषु ॥२८

(इति सर्वे यथागतं गच्छन्ति जवनिकापातः) ।

१—परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म-संस्थापनार्थाय सम्भवामि युगे युगे । (गीता)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[तृतीयः राममारीचसंवादः]

(द्वितीयसर्गग एव)

(तत्र जवनिकोत्तोलने एकत्र सलक्ष्मणो रामः सधनुः-शस्त्रसन्नद्धोऽपरतश्च नीलकवचसन्नद्धाः सशस्त्रा मारीचादयो राक्षसाः)

रामः—अये मायाविन् मारीच ! शृणु मे वचः—

आत्मंभरिस्त्वं पिशितैर्नराणां फलेग्रहीन् हंसि वनस्पतीनाम् ।
शौवस्तिकत्वं विभवा न येषां व्रजन्ति तेषां दयसे न कस्मात् ।३३

मारीचः—अये क्षत्रियवीर राम ! किं त्वमस्माकं धर्मं न वेत्सि ? शृणु मे साभिप्रायं वचः—

'अद्यो द्विजान् देवयजीन्निहन्मः कुर्मः पुरं प्रेतनराधिवासम् ।
धर्मो ह्ययं दाशरथे ! निजो नो नैवाध्यकारिष्महि वेदवृत्ते ॥३४

रामः—धनुरधिज्यं कुर्वन् साटोपमग्रे भवन् अये मारीच !

धर्मोऽस्ति सत्यं तव राक्षसायमन्यो व्यतिस्ते तु ममापि धर्मः ।
ब्रह्मद्विषस्ते प्रणिहन्मि येन राजन्यवृत्तिर्धृतकार्मुकेषुः ॥३५

(इत्युभौ परिक्रामन्तौ युध्येते पश्चान्मारीचः पलायते)

रामः—(लक्ष्मणं प्रति) अये लक्ष्मण ! गतोऽयं विलयं मारीच इति भगवन्तं विश्वामित्रम् आवेदयामः चल द्रुतम् ।

(इति निर्गतौ) जवनिकापातः ।

१—दुष्टाः स्वदोषगोपनं युक्त्या कुर्वन्तीति ब्रह्मोपर्यपि क्रोधो मारीचस्य ध्वन्यते दोषगोपनच्छद्मना ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[चतुर्थो जनता-राम-संवादः]

(तृतीय-सर्गगः)

जवनिकोत्तोलनेन एकतोऽयोध्याजनताऽपरतश्च रामो वनगमनवेशे सीता-लक्ष्मणाभ्यां सह रङ्गमञ्चे दृश्येते)।

जनता—(शोकार्ता) अये महावीर राम! किञ्चिदस्माकं निवेदनं शृणोतु भवान्!

राजाऽप्रशान्तस्तव मध्यमाम्बा नारीति तां नैव वयं वदामः।
स्यादत्र किं वा भारतस्य माया वनं भवान्नैव कदापि यायात्।१०

रामः—(दृढतया)

शृण्वन्तु सर्वे मिलिता भवन्तः शोशुच्यमानान् भवतो वदामः।
किं शोचतेहाऽभ्युदये वतास्मान्नियोगलाभेन पितुः कृतार्थान्।१२

अपि च—

असृष्ट यो यश्च भयेष्वरक्षीद्यः सर्वदाऽस्मानपुपत्स्त्रपोषम्।
महोपकारस्य किमस्ति तस्य तुच्छेन यानेन वनस्य मोक्षः।१३

अपरं च—

विद्युत्प्रणाशं स वरं प्रनष्टो यद्वोर्ध्वशोषं तृणवद्विशुष्कः।
अर्थे दुरापे किमुत प्रवासे न शासने वाऽस्थित यो गुरूणाम्।१४

पुनश्च—

यूयं विशोका भवतेति याचे तातस्य शोकापनुदा भवेत।
मा दर्शतान्यं भरतं च मत्तो रथोऽपि मे तिष्ठतु शश्वदत्र ॥१५

जनता—कथं वयं भवत आज्ञामुल्लंघयाम इति यथा भवानादिशति तथैवानुष्ठास्यामः (इति प्रमुखमुखेनाऽभिधाय जनता विरता। पश्चाज्जवनिकापातः)।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[श्रीरामभरतयोः संवादः पञ्चमः]

(तृतीय-सर्गग एव)

(उभौ जटाभृद्वेशे भरतः शुक्लवस्त्रे रामश्च वल्कलवेशे प्रविशतः)

रामः— अये भरत ! कथं त्वं मां परावर्तयितुमागृह्णासि शृणु भूतार्थम्—

अरण्य-याने सुकरे पिता मां प्रायुंक्त राज्ये वत ! दुष्करे त्वाम् ।
मा गाः शुचं वीर ! भरं वहामुं प्रभाष्यसे त्वं मयका कनीयान् ॥५१

अपरञ्च—

कृती श्रुतौ वृद्धमतेषु धीमांस्त्वं पैतृकं चेद्वचनं न कुर्य्याः ।
विच्छिद्यमानेऽपि कुले परस्य, पुंसः कथं स्यादिह पुत्रकाम्या ॥५२

अपि च—

अस्माकमुक्तं बहु मन्यसे चेद् यदीशिषे त्वं न मयि स्थिते च ।
जिहेष्यतिष्ठन् यदि तात-वाक्ये जहीहि शंकां व्रज शाधि पृथ्वीम् ॥५३

भरतः—अलम् अलम् भ्रातृवर्य ! ममापि तु शृणोतु भवान्—

वृद्धौरसां राजधुरां प्रवोढुं कथं कनीयानहमुत्सहेय ।
मा मां प्रयुँक्थाः कुलकीर्तिलोपे धर्म्यं वचो मे भवताऽवधेयम् ॥५४

अहो किं भवान् एवं वक्ति—(दर्शयन्नङ्गुल्या)

उर्जस्वलं हस्तितुरंगमेतदमूनि रत्नानि च राजभाञ्जि ।
राजन्यकं चैतदहं चितोन्द्रस्त्वयि स्थिते स्यामिति शान्तमेतत् ? ५५

रामः—(अग्रे भूत्वा हस्तौ चालयन्)—

नहि नहि तव वाक्यं श्राव्यमेतत् कथंचित्
व्रज भरत ! गृहीत्वा पादुके त्वं मदीये ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्युतनिखिलविशङ्कः पूज्यमानो जनौघैः
सकलभुवनराज्यं कारयास्मन्मनेन ॥५६

भरतः—यथा भवते रोचते। ज्येष्ठोभ्राता पितृवन्मान्य इति सर्वं भवदुक्तं करिष्ये। परन्तु शृणोतु मे दृढां प्रतिज्ञाम्—

नन्दीग्रामे जटां धृत्वा भवादग्रतमास्थितः।
रक्षिष्यामि भवद्राज्यं यथालिश्चाम्पके वने ॥५७

वर्षे चतुर्दशेप्राप्ते प्रतिज्ञां पूरयन् भवान्।[1]
नोपस्थासीष्ट चेदन्ते प्राणांस्त्यक्ष्यामि निश्चितम् ॥५८

(इति निर्गतौ। जवनिकापातः)।

[[2]—सूर्पणखा लक्ष्मण-संवादः ६ षष्ठः]

(चतुर्थ सर्गगः)

(तत्र धृताप्सरोवेशा सूर्पणखा सजटं धनुर्बाणधरं सुन्दरं गौरं लक्ष्मणं रङ्गे चक्रम्यमाणं वीक्ष्य विमुग्धा सहावभावं वक्ति)।

सूर्पणखा—(पार्श्वे गत्वा हस्तनिर्देशं स्वलावण्यं दर्शयन्ती)।

सौमित्रे! मामुपायंस्थाः कन्यामिच्छुर्वशवदाम्।
त्वद्भोगानां सहचरीमशङ्कः पुरुषायुषम् ॥६०॥

१—भ्रातृसौहार्दम् भारतीयं वैदेशिकाः पश्यन्तु। भारतीया अपि रक्षन्तु भारतीयमिदं वैशिष्ट्यम् इति संवाद-शिक्षा।

२—इयं रावणस्य मातृष्वस्त्रीया खरदूषणयोः सोदरा सर्वानर्थ-बीजभूता द्वितीया मन्थरैव रावण-कुलविनाशिनी)।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्ष्मणः—(साश्चर्यं सहासञ्च)।

अये सुरूपे ! गौष्ठीने वने स्त्रीपुंसभीषणे ।
असूर्यंपश्यरूपा त्वं किमभीरुररण्यसे ॥२१॥

अपि च—(तत्सम्मुखे हस्तं कृत्वा)।

मानुषानभिलष्यन्ती रोचिष्णुर्दिव्यधर्मिणी ।
त्वमप्सरायमाणेह स्वतन्त्रा कथमञ्चसि ॥२२॥

अन्यच्च—

उग्रम्पश्याकुलेऽरण्ये शालीनत्वविवर्जिता ।
काम्रुकप्रार्थनापट्वी पतिवत्नी कथं न वा ॥२३॥

शृणु मे सावधानं वचः—(अङ्गुल्या सङ्केतयन्)।

राघवं पर्णशालायामिच्छानुरहसं पतिम् ।
यः स्वामी मम कान्तावान् औपकर्णिकलोचनः ॥२४॥

अपि च—

वपुश्चान्दनिकं यस्य कार्णवेष्टकिकं मुखम् ।
संग्रामे सर्वकर्मीणौ पाणी यस्योपजानुकौ ॥२५॥

बद्धो दुर्बलरक्षार्थमसिर्येनोपनीविकः ।
यश्चापमाश्मनप्रख्यं सेषुं धत्तेऽन्यदुर्दमम् ॥२६॥

किं बहुना—

जेता यज्ञद्रुहां संख्ये धर्मसन्तानसूर्वने ।
प्राप्य दारगवानां यं मुनीनामभयं सदा ॥२७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्पणखा—अहो यद्यं वं तदाऽहं तमेव प्रार्थये त्वं सूखी भव—
(इति तत्र दूरे स्थितं वने दत्त-दृष्टिं रामं गत्वा ब्रूते)
हस्तेन भावं दर्शयन्ती। (जवनिकापातेन दृश्यान्तरंकृत्वा)

पश्य राघव ! मे रूपं लक्ष्मणाभिगताऽप्यहम् ।
आगता त्वामुपायंस्थाः स्रग्विणीं मां शुभाननाम् ॥२८

रामः—(तन्मुखो भूत्वा) अयि साध्वि ! नैवं वम्भ्रम्यस्व शृणु—

अस्त्रीकोऽसावहं स्त्रीमान् स पुष्यतितरां तव ।
पतिरित्यहमाख्यामि तमेव व्रज मा शुचः ॥२९

सूर्पणखा—(मनसि) अहो अयं तु प्रत्याख्याति स्त्रियं च बिभर्ति
स तु गौरोऽतिसुन्दरश्चेति तत्रैव मे गमनं वरम्। (पुना
स्तत्र गत्वा वक्ति—अत्राणि जवनिकापातेन दृश्यान्तरम्)

कथं सुन्दर! सामित्रे! वृषस्यन्तीं जहासि माम् ।
मन्मथायुधसम्पातव्यथ्यमानमतिं वराम् ॥३०

(ततो लक्ष्मणस्तामपनसं कर्तुकामः कक्षतोऽसि-पुत्रीमाकृष्याति-
क्रुद्धः)।

अये पुंश्चलि ! दुर्वृत्ते कथमेषि पुनः पुनः ।
भव त्वं कामुकाऽनर्हेत्यास्यं तेऽपनसं भवेत् ॥३१

(इति तन्मुखमपनसं कृत्वा दूरीभवति। साऽप्यतिक्रुद्धा नासि-
कारक्तमुत्क्षिपन्ती लक्ष्मणं भर्त्सयन्ती वक्ति)—

सूर्पणखा—(उच्चैः)।

अहं सूर्पणखा नाम्ना नूनं नाज्ञायिषि त्वया ।
दण्डोऽयं क्षेत्रियो येन मय्यपात्यविवेकिना ॥३२

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्नद्धो भव मेऽद्यैव भ्रातरौ खरदूषणौ ।
युवामवनिसात्कर्तुं सत्वरं समुपैष्यतः ॥३३

(इत्युक्त्वाऽपक्रान्ता सौ तु तत्रैव स्थितौ स्थाने)
जवनिकापातः ।

[सूर्पणखा-खरदूषणसंवादः ७ सप्तमः]

(चतुर्थ-सगर्गः)

(छिन्ननासा परमक्रुद्धा सूर्पणखा खरदूषणयोः स्वभ्रात्रोः पार्श्वे राक्षसान्निन्दन्ती ब्रूते) ।

सूर्पणखा—

कुपात्रे-समितावत्र खट्वारूढौ प्रमादिनौ ।
महानर्थमिहारण्ये किं किमस्तीति बुध्यताम् ॥३४

कृते सौभागिनेयस्य भरतस्य विवामितौ ।
पित्रा दौर्भागिनेयौ यौ पश्यतं चेष्टितं तयोः ॥३५

(नासां दर्शयति)

मम रावणनाथाया भगिन्या युवयोः पुनः ।
अयं तापसकाद् ध्वंसः क्षमध्वं यदि वः क्षमम् ॥३६

अपि च—

असंस्कृत्रिमसंध्यानावनुष्त्रिमफलाशिनौ ।
अभूत्रिमपरीवारौ पर्य्यभूतां तथापि माम् ॥३७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ततः परिहसन्तौ दुर्ललितौ तौ व्यङ्ग्यवचसा तामुत्तरयतः)

खरदूषणौ—

श्वःश्रेयसमवाप्ताऽसि किं जल्पसि वरानने !
प्राणिमस्तव मानार्थं व्रज श्वसिहि मा रुदः ॥३८

पश्य—

जक्षिमोऽनपराधेऽपि नरान्नक्तंदिवं वयम् ।
कुतस्त्वं भीरु ! यक्षेभ्यो द्रुह्यद्भ्योऽपि क्षमामहे ॥३९

पुरः पश्य—

आः ! चतुर्दशसाहस्रबला यामो द्रुतं वयम् ।
पारश्वधिकधानुष्कशक्तीकप्रासिकान्विताः ॥४०

(इति निर्गताः सर्वे तत्रैव रङ्गे सङ्घीभूता दृश्यमानाः)

(समाप्तोऽयं संवादः जवनिकापातः)

[सूर्पणखा-रावण-संवादः अष्टमः]

(पञ्चम-सर्गः)

[तत्र राजसिंहासने समुपविष्टस्य राक्षसराजस्य रावणस्य सभां प्राप्य सूर्पणखा बहु राजनैतिकं प्रलपति ! रावणोऽपि तच्छ्रुत्वा बहुप्रलपन् तां सान्त्वयति ।]

सूर्पणखा—

अये राक्षसराज ! त्वं कथमेवं प्रमाद्यसि ।
कथं ते सुस्थिरं राज्यं स्यादेवमिति चिन्तय ॥४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सावधानमना भूत्वा शृणु त्वां वच्मि साम्प्रतम् ।
यत्किञ्चिदहमागत्य तत्रो काय्यकरं भवेत् ॥५

दण्डकानध्यवत्तां यौ वीर-रक्षःप्रकाण्डकौ ।
नृभ्यां संख्येऽकृपातां तौ सभृत्यौ भूमिवर्धनौ ॥६

विग्रहस्तव शक्रेण बृहस्पतिपुरोधसा ।
सार्धं कुमार-सेनान्या शून्यश्चासीति को नयः ॥७

यद्यहं नाथ ! नायास्यं विनासा हतबान्धवा ।
नाज्ञास्यस्त्वमिदं सर्वं प्रमाद्यंश्चारदुर्बलः ॥८

करिष्यमाणं विज्ञेयं कार्यं किन्नु कृतं परैः ।
अपकारे कृतेऽप्यज्ञो विजिगीषुर्न वा भवान् ॥९

वृतस्त्वं पात्रेसमितैः खट्वारूढः प्रमादवान् ।
पानशौण्डः श्रियं नेता नात्यन्तीनत्वमुन्मनाः ॥१०

अध्वरेष्वग्निचित्सत्सु सोमसुत्वत आश्रमान् ।
अत्तुं महेन्द्रीयं भागमेति दुश्च्यवनोऽधुना ॥११

आमिक्षीयं दधि-क्षीरं पुरोडाश्यं तथौषधम् ।
हविर्हैयङ्गवीनं च नाऽप्युपघ्नन्ति राक्षसाः ॥१२

युवजानिर्धनुष्पाणिर्भूमिष्ठः खविचारिणः ।
रामो यज्ञद्रुहो हन्ति कालकल्पशिलीमुखः ॥१३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोज्यान्योष्ठावलोप्यानि साधनीयानि देवताः ।
अश्नन्ति रामाद् रक्षांसि बिभ्यत्यश्नुवते दिशः ॥१४

कुरु बुद्धिं कुशाग्रीयामनुकामीनतां त्यज ।
लक्ष्मीं परम्परीणां त्वं पुत्रपौत्रीणतां नय ॥१५

सहायवन्त उद्युक्ता बहवो निपुणाश्च याम् ।
श्रियमाशासते लोलां तां हस्तेकृत्य मा श्वसीः ॥१६

लक्ष्मीः पुंयोग माशंसुः कुलटेव कुतूहलात् ।
अन्तिकेऽपि स्थिता पत्युश्छलेनान्यं निरीक्षते ॥१७

योषिद् वृन्दारिका तस्य दयिता हंसनादिनी ।
दुर्वाकाण्डमिव श्यामा न्यग्रोध-परिमण्डला ॥१८

नास्यां पश्यति यस्तस्या निस्ते दन्तच्छदं न वा ।
संशृणोति न चोक्तानि मिथ्याऽसौ विहितेन्द्रियः ॥१९

सारोऽसाविन्द्रियार्थानां यस्यासौ तस्य नन्दथुः ।
तल्पे कान्तान्तरैः सार्धं मन्येऽहं भिङ्गनिमज्जथुम् ॥२०

न तं पश्यामि यस्यासौ भवेन्नोदेजया मतेः ।
त्रैलोक्येनापि विन्दस्त्वं तां क्रीत्वा सुकृती भव ॥२१

नैवेन्द्राणी न रुद्राणी न मनावी न रोहिणी ।
वरुणानी न चाग्नायी तस्याः सीमन्तिनी समा ॥२२

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतस्तामपहृत्यैव सुखीभवतु वै भवान् ।
ममापि शान्तिः स्यादेवं लोष्टस्योपरि प्रस्थरम् । (क)

[ततोऽतिक्रुद्धो रावणो भर्त्सयन् तां वक्ति]

रावणः—सूर्पणखे !

अहो ! अनर्गलं ब्रूषे स्वाश्वसि ह बिभेषि किम् ;
त्यज नक्तञ्चरि क्षोभं वाचाटे रावणो ह्यहम् ॥२३
मामुपाप्त दिदृक्षावान् याष्टीकव्याहतो हरिः ।
आज्ञालाभोन्मुखो दूरात् काक्षेणाऽनादरेक्षितः ॥२४
विरुद्धोदग्रधागग्रः कुलिशो मम वक्षसि ।
अभिन्नं शतधाऽत्मान मन्यते बलिनं बला ॥२५
कृत्वा लङ्काद्रुमाज्जानमहमैरावतं गजम् ।
बन्धनेऽनुपयोगित्वान्नतं तृणमिवात्यजम् ॥२६
आहोपुरुषिकां पश्य मम सद्रत्नकान्तिभिः ।
ध्वस्तान्धकारेऽपि पुरे पूर्णेन्दोः सन्निधिः सदा ॥२७
हृतरत्नश्च्युतोद्योगो रक्षोभ्यः करदो दिवि ।
पूतक्रतायीमभ्येति सत्रपः किं न गोत्रभिद् ॥२८
अतुल्यमहसा सार्द्धं रामेण सह विग्रहः ।
त्रपाकरस्तथाप्येष यतिष्ये तद्विनिग्रहे ॥२९

[इत्युक्त्वा क्रोधे बहिर्निगतः । सूर्पणखाऽपि जन-स्थानं यथागतं गता जवनिकापातः] ।

१—गर्हितं स्वात्मना स्वप्रशंसनम् तदेव रावणः करोति परस्त्रीहरणेऽपि नह्रीस्तस्येतीयमेव राक्षसीवृत्तिः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[रावण-मारीच-संवादः नवमः]

(पञ्चम-सर्गग एव)

(रावणो मारीचं समेत्य स्वनिर्णयं स्वयं श्रावयति। स तु तं भर्त्सयन् रामेण सह विरोद्धुं विरुणद्धि)—

रावणः—

मारीच ! श्रृणुयास्त्वं मे निर्णयं यं ब्रवीम्यहम् ।
रामोऽसौ दण्डकारण्येऽहन् बहून् राक्षसान् किल ॥३०

तद्भ्राता लक्ष्मणश्चेति श्रुत सूर्पणखामुखात् ।
तद्भार्यां सुन्दरीं हर्तुं साहाय्यं मे समाचर ॥३१

(ततो मारीचस्तं भर्त्सयन् वक्ति)

मारीचः—

अन्तर्धत्स्व रघुव्याघ्रात्तस्मात्त्वं राक्षसेश्वर !
यो रणे दुरुपस्थानो हस्तरोधं दधद्धनुः ॥३२

भवन्तं कार्तवीर्यो यो हीनसन्धिमचीकरत् ।
जिगाय तस्य जेतारं स रामः सार्वलौकिकम् ॥३३

यमास्य दृश्वरी तस्य ताडका वेत्ति विक्रमन् ।
शूरम्मन्यो रणाच्चाहं निरस्तः सिंहनर्दिना ॥३४

रावणः—(क्रुद्धोऽसिं चालयन् वक्ति)

रे ! कस्याग्रे ब्रवीष्येवं मां न पश्यसि रावणम् ।
यातयामं विजितवान् स रामं यदि किं ततः ॥३५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अघानि ताडका तेन लज्जाभयविभूषणा ।
स्त्रीजने यदि तच्छ्लाघ्यं धिग्लोकं क्षुद्रमानसम् ॥४०

यद् गेहेन दिनमसौ शरैर्भीरुमभाययत् ।
कुब्रह्मयज्ञके रामो भवन्तं पौरुषं न तत् ॥४१

मारीचः—(अये राक्षसराज ! किञ्चिद्विचार्य ब्रूहि)—

न त्वं तेनान्वभाविष्ठा नान्वभावि त्वयाऽप्यसौ ।
अनुभूतो मया चासौ तेन चान्वभविष्यहम् ॥३५

अध्यङ् शस्त्रभृतां रामो व्यश्चरतं प्राप्य मद्विधाः ।
स कन्याशुल्कमभनङ्मिथिलायां मखे धनुः ॥३६

संवित्तः सह युध्वानौ तच्छक्तिं खरदूषणौ ।
यज्वानश्च ससुत्वानो यानगोचीन्मखेषु सः ॥३७

रावणः—(हसन् अहो भीरवः तिलमपि तालं कुर्वन्ति) ।

चिरकालोषितं जीर्णं कीटनिष्कुषितं धनुः ।
किं चित्रं यदि रामेण भग्नं क्षत्रियकान्तिके ॥४२

अन्यच्च—

वनतापसके वीरौ विपक्षे गलितादरौ ।
किं चित्रं यदि सावज्ञौ मम्रतुः खरदूषणौ ॥४३

मारीचः—(उच्चैः) कस्त्वामवलेपिनं बोधयेत्तथापि शृणु—

सुखजातः सुरापीतो नृजग्धो माल्य-धारयः ।
अधिलङ्कं स्त्रियो दीव्य ! मारब्धा बलिविग्रहम् ॥३८

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रावणः—(अतिक्रुद्धः पुनरसिं क्षिपन् उच्चैर्वक्ति)—

त्वं सुभीरु सुदुर्बुद्धे ! नित्यं शरणकाङ्क्षसि ।
गुणांश्चापह्नुषेऽस्माकं स्तौषि शत्रूँश्च नः सदा ॥४४

शीर्षच्छेद्यमतोऽहं त्वां करोमि क्षितिवर्द्धनम् ।
कारयिष्यामि वा कृत्यं निजिघृक्षुर्नौकसौ ॥४५

(इत्युक्त्वा पृच्छति)—वद वद किं वदसि—इति

मारीचः—(अञ्जली बध्वा)—

जिजीविषुरहं वच्मि शृणु मां राक्षसेश्वर !
छद्मना तावपाकर्तुमभ्यमित्रो भवामि ते ॥४६

हरामि रामसौमित्री मृगो भूत्वा मृगद्युवौ !
उद्योगमभ्यमित्रीणो यथेच्छं त्वं च सन्तनु ॥४७

[इत्युभौ निर्गतौ जवतिकापातः]

[सीतालक्ष्मण-संवादः दशमः]

(पञ्चम-सर्गग एव)

(उटजे यथासुखं समुपविष्टौ तौ दृश्येते । तत्र मृगशब्दमेव राम-शब्दं मत्वा लक्ष्मणं रामसाहाय्यार्थं प्रेरयन्ती सीता ब्रूते)—

सीता—(करुणस्वरे) अये सौमित्रे ! श्रुतन्त्वया स्वभ्रातुरार्तक्रन्द-नम्—

एष प्रावृषिजाम्भोदनादी भ्राता विरौति ते ।
ज्ञातेयं कुरु सौमित्रे ! भयात् त्रायस्व राघवम् ॥५४

१—मारीचस्तथ्यमुक्त्वाऽपि मातुर्वधकारणाद्दुष्कर्मणि रामवञ्चनात्मके प्रवृत्तः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्ष्मणः—नहि नहि भ्रातृजाये ! भवतीदं व्यर्थमन्यथा विशंकते ।

राम संघुषितं नैतन्मृगस्यैव विवश्चिषोः ।
रामस्वनित-संकाशः स्वान इत्यवगच्छ तात् ॥५५

शृणोतु भूतार्थम्—

आप्यान्स्कन्धकण्ठांसं रुपितं सहितुं रणे ।
प्रोणुवन्तं दिशो बाणैः काकुत्स्थं भीरु ! कः क्षमः ॥५६

अत इदं निश्चितं वेत्तु—

देहं बिभ्रत्तुरस्त्राग्नौ मृगः प्राणैर्विदेषिन् ।
व्याघुष्टकठिनाङ्गुष्ठं राममायान्तुमूर्षया ॥५७

शत्रून् भीषयमाणं तं रामं विस्मापयेत कः ।
मा स्म भैषी स्त्वयाद्यैव कृतार्थं द्रक्ष्यसे पतिः ॥५८

(ततः सीता क्रुद्धतरा भर्त्सयन्तीतं ब्रूते)—

सीता—

यायास्त्वमिति कामो मे गन्तुमुत्सहसे न च ।
इच्छुः कामयितुं त्वं मां धिक् त्वां जाल्ममपौरुषम् ॥५९

(ततोऽप्यतिक्रुद्धो लक्ष्मण उवाच)—

लक्ष्मणः—

मृषोद्यं प्रवदन्तीं त्वां सत्यवद्यो वदाम्यहम् ।
अनार्यं शंकसे कस्माच्छत्रुहस्तेऽद्य मा गमः ॥६०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शत्रु हस्तं न यायास्त्वं रेखामेतां न सन्त्यजेः ।
सदाऽवधेया वाक्यं मे त्वां ब्रुवे तत्त्वतोऽधुना ॥६१

(इत्युक्त्वऽतिक्रुध्यन् विनिर्गतः ।जवनिकापातः)

[रावण सीता-संवाद एकादशः ११]

(पञ्चम-सर्गमः)

(तत्र [1]रावणस्तपस्विवेशभृत् त्रस्यन् सीतामुपेत्य इतस्ततो दिशोऽवलोकयन् आध्यात्मपद्यानि च पठन् ब्रूते) रावणः—

सायन्तनीं तिथिप्रश्यः पङ्कजानां दिव तनीम् ।
कान्ति कान्त्या सदातन्या हेपयन्ती शुचिस्मिता ॥६५

का त मेकाकिनी भीरु निरन्वयजने वने ।
क्षुध्यन्तोऽप्यघसन् बालास्त्वामपालां कथं न वा ॥६६

हृदयङ्गमसूर्त्तिरवं सुभगं भावुकं वनम् ।
कुर्वाणा भीममप्येतद् वदाभ्यैः केन हेतुना ॥६७

सुकुतं प्रियकारी त्वं कं रहस्युपतिष्ठसे ।
पुण्यकृच्चाटुकारस्ते किंकरस्सुरतेषु कः ॥६८

परि पर्युदधे रूपमाद्यलोकाच्च दुर्लभम् ।
भावत्कं दृष्टवत्स्वेतदस्मास्वधि सुजीवितम् ॥६९

१—रावणस्य विदुषोऽपि दुष्कर्मणि प्रवृत्तौ स्वभावः कारणम् । यथोक्तम् 'साक्षय विपरीता श्चेद्राक्षसा एव केवलम्' इति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आपीतमधुका भृङ्गैः सुदिवेवारविन्दिनी ।
सत्परिमललक्ष्मीका नापुंस्काऽऽसीति मे मतिः ॥७०

मिथ्यैव श्रीः श्रियंमन्या श्रीमन्मन्यो मृषा हरिः ।
साक्षात्कृत्याभिमन्येऽहं त्वां हरन्तीं श्रियः श्रियम् ॥७१

नोदकण्ठिष्यतात्यर्थं त्वामैक्षिष्यत चेत् स्मरः ।
खेलायन्ननिशं नापि सज्जकृत्यः रतिं वसेत् ॥७२

वल्गूयन्तीं विलोक्य त्वां स्त्री न मन्तूयतीह का ।
कान्तिं नाभिमनायेत को वा स्थाणु-समोऽपि ते ॥७३

दुःखायते जनः सर्वः स एवैकः सुखायते ।
यस्योत्सुकायमाना त्वं न प्रतीयायसेऽन्तिके ॥७४

कः षण्डतायमानस्त्वामादायामिष-सन्निभाम् ।
त्रस्यन् वैरायमाणेभ्यः शून्यमन्ववसद्वनम् ॥७५

(एवं यथेच्छं वदति दशानने ओजायमाना सीतापि भर्त्सयन्ती तं ब्रवीति)— सीता—

अहो ! साधो ! कथं त्वं मां वेशभृच्च तपस्विनः ।
ब्रूषे त्वनर्गलं वाक्यं शोभनं न भवादृशाम् ॥७६

महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम ।
पितुः प्रियङ्करो भर्ता क्षेमकारस्तपस्विनाम् ॥७७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निहन्ता वैरकाराणां सतां बहुकरः सदा ।
पारश्वधिकरामस्य शक्तैरन्तकरो रणे ॥७८

अध्वरेष्विष्टिनां पाता पूर्तौ कर्मसु सर्वदा ।
पितुर्नियोगाद् राजत्वं हित्वा योऽभ्यागमद्वनम् ॥७९

पतत्रिक्रोष्टुजुष्टानि रक्षांसि भयदे वने ।
यस्य बाण-निकृत्तानि श्रेणीभूतानि शेरते ॥८०

दीव्यमानं शितान् बाणानस्यमानं महागदाः ।
निघ्नानं शात्रवान् रामं कथं त्वं नाद्यगच्छसि ॥८१

भ्रातरि न्यस्य यातो मां मृगाविन्मृगयामसौ ।
एषितुं प्रोषितो यातो मया तस्यानुजो वनम् ॥८२

(एवं निर्भीकां ब्रुवतीं सीतां रावणो भर्त्सयन्ब्रूते गृहीत्वा पलायते च)
रावणः—अयि बहुभाषिणि ! किमात्मानं प्रशंससि—

कृते कानिष्ठिनेयस्य ज्यैष्ठिनेयं विवासितम् ।
को नग्नमुषितप्रख्यं बहु मन्येत राघवम् ॥८४

राक्षसान् बहुयागेषु पिण्डीशूरान् निरस्तवान् ।
यद्यसौ कूपमाण्डूकि तवैतावति कः स्मयः ॥८५

मत्पराक्रमसंक्षिप्तराज्यभोगपरिच्छदः ।
युक्तं ममैव किं वक्तुं दरिद्राति यथा हरिः ॥८६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्लङ्को विमदः स्वामी धनानां हृतपुष्पकः ।
अध्यास्ते ऽन्तर्गिरं यस्मात् कस्तन्नावैति कारणम् ॥८७

भिन्न-नौक इव ध्यायन् मत्तो बिभ्यद् यमः स्वयम् ।
कृष्णिमानं दधानेन मुखेनास्ते निरुद्यतिः ॥८८

समुद्रोपत्यका हैमी पर्वताधित्यकापुरी ।
रत्नपारायणं नाम लङ्केति मम मैथिलि ॥८९

आवासे सिक्तसम्मृष्टे गन्धैस्त्वं लिप्तवासता ।
अर्पितोरुसुगन्धिस्रक् तस्यां वस मया सह ॥ ०

संगच्छ पौंस्नि ! स्त्रैणं मां युवानं तरुणी शुभे ।
राघवः प्रोष्यपापीयान् जहीहि तमकिञ्चनम् ॥९१

अश्नीत-पिबतीयन्तो प्रसिता स्मर कर्मणि ।
वशीकृत्य दशग्रीवं मोदस्व वर-मन्दिरे ॥९२

मास्म भूर्ग्राहिणी भीरु गन्तुमुत्साहिनी भव ।
उद्भासिनी च भूत्वा मे शय्यासम्मर्दिनी भव ॥९३

त्वं प्रतिकूलिकी चेत्स्या हरामि त्वां शुभानने ।
चल दीव्य मया साकमधिलंकं रमस्व ह ॥९४

(इत्येवं वदन् बाहुपीडं तां गृहीत्वा स द्यां जगाहे । जवनिकापातः)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[जटायु-रावण-संवादः १२ द्वादशः]

(पञ्चम-सर्गगः)

(तत्र सीतामादाय पलायमानं रावणं निरुन्धन् [1]जटायुस्तं भर्त्सयति)

द्विपन् वनेचराग्र्याणां त्वमादायचरो वने ।
अग्रेचरो जघन्यानां मा भूः पूर्वसरो मम ॥
यशस्करसमाचारं ख्यातं भुवि दयाकरम् ।
पितुः प्रियकरं रामं धिक् त्वां दुन्धन्तमत्रपम् ॥
अहमन्तकरो नूनं ध्वान्तस्येव दिवाकरः ।
तव राक्षस ! रामस्य नेयः मकरोपमः ॥

(इति क्रुध्यन् जटायूः रावणं तुण्डघातम् घ्नन् तुमुलमयुध्यत । ततो जटायुं हत्वा सीतामादाय स पलायत मोमुह्यमानः) रावणः—

विलुटसि धरणौ निकृत्तपक्षः कथमिह मां नहि रावण प्रवेत्सि ।
रथवरमधिरुह्य पश्यतस्ते स्वपुरमुपैमि समुह्य रामकान्ताम् ॥

(इति भूमौ लुठन्तं जटायुं त्यक्त्वा विनिर्गतो रावणः । जवनिकापातः)

अथतृतीयः सर्गः

[श्रीराम-लक्ष्मण-संवादः १३ त्रयोदशः]

(षष्ठ-सर्गगः)

(सधनुर्बाणो मृगं हत्वा निवृत्तो रामो मध्येमार्गमायान्तं लक्ष्मणं वीक्ष्य सन्दिहानो ब्रूते)— रामः—

१—'यान्ति न्याय-प्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्' इति शिक्षयति संवादः ।

इति द्वितीयः सर्गः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथं लक्ष्मण ! मार्गेऽसि सीता क्व स्थापिता त्वया ?
अये ! पृच्छामि सीतां [1]त्वां शीघ्रं ब्रूहि क्व साऽधुना ॥७

याचे सुरान् शिवं सर्वान् भिक्षे तां काननं कथम् ।
आरुन्धे मां मनः शोको देहं प्राणान् दुहन्निव ॥८

(आश्रमे समुपस्थाय परितो वीक्ष्य पुनर्ब्रूते) रामः—

कथं नाख्यासि तां मां त्वं शून्यं शरणमाः कथम् ।
गता स्यादवचिन्वाना कुसुमान्याश्रमद्रुमान् ॥९

अथवा सा गता तत्र यत्र स प्रवरो मुनिः ।
सुतीक्ष्णस्तापसान् धर्मं पवित्रं शास्ति सर्वदा ॥१०

आः कष्टं बत ही चित्रं हुँ मातर्दैवतानि धिक् ।
हा पितः क्वासि हे सुभ्रु ! विलापं न शृणोषि मे ॥११

अशयिष्ठा इहासिष्ठा स्त्व सखेलमिहागमः !
अयोध्यायास्स्मरन्ती मामिहावोचो मनोगतम् ॥१२

इदं नक्तन्तनं दाम पौष्पमेतद् दिवातनम् ।
शुचेवोद्बध्य शाखायां प्रम्लायति त्वया विना ॥१३

ऐक्षिष्महि मुहुः सुप्तां त्वां मृताशङ्कया वयम् ।
अकाले दुर्मरमहो यज्जीवामस्त्वया विना ॥१४

१—इतो दुहादि धातूनामुदाहरणम् 'अकथितञ्च १।४।५१। इति कर्मसंज्ञा दशमपद्यावधि । ततः पञ्चपद्यान्तं प्रकीर्णकं समाप्य सापवादः सिजधिकारः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अक्षेमः परिहासोऽयं परीक्षां मा कृथा मम ।
मत्तो मान्तर्धिथाः सीते ! मा रंस्था जीवितेन नः ॥१५

अहं न्यवधिषं भीमं राक्षसं क्रूरविक्रमम् ।
मा घुक्षः पत्युरात्मानं मा न श्लिक्षः प्रियं प्रिये ॥१६

मा स्म द्राक्षीर्मृषा दोषं भक्तं मां माति चिक्लिशः ।
शैलं न्यशिश्रियो वामे ! नदीं नु प्रत्यदुद्रुवः ॥१७

ऐ वाचं देहि धैर्य्यं नस्तव हेतोरसुस्सुवत् ।
त्वं नो मतिमिवाऽघासी र्नष्टा प्राणानिवादधः ॥१८

रुदतोऽश्रिश्वयच्चक्षुरास्यं हेतोरतवाऽश्वयीत् ।
म्रियेऽहं मां निरास्थश्चेन्मानवोचश्चिकीर्षितम् ॥१९

लक्ष्मणाचक्ष्व यद्याख्यत्सा किञ्चित्कोपकारणम् ।
दोषे प्रतिसमाधानमज्ञाते क्रियतां कथम् ॥२०

इह सा व्यलिपद्गन्धैः स्नान्तीहाभ्यषिचज्जलैः ।
इहाहं द्रष्टुमाहूं तां किन्न स्मरसि लक्ष्मण ! ॥२१

लक्ष्मणः—(सान्त्वयन् ब्रूते)—

स्मरामि सकलं भ्रातः विलापस्ते न शोभते ।
विधिः सान्ध्यः समापन्नस्ततः सन्ध्यां समाचर ॥२३

तथाऽर्तोऽपि क्रियां धर्म्यां त्वं कालेनाऽमुचः क्वचित् ।
महतां हि क्रिया नित्या छिद्रे नैवावसीदति ॥२४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[श्रीराम-लक्ष्मण-संवादः चतुर्दशः १४]

(षष्ठ-सर्गगः)

(कृतसान्ध्यकर्मा रामः पुनर्लक्ष्मणं ब्रूते)— रामः—

कृतसन्ध्योऽस्मि सौमित्रे यदा त्वं बहिरभ्यगाः ।
साम्प्रतं त्वाह्वये शूरान् राक्षसान् पश्य लक्ष्मण ! (२४ क)

एत सीताद्रुहः संख्ये प्रत्यर्थयत राघवम् ।
गेहेनर्दित्वमालम्ब्य कथं तिष्ठत भीरवः ॥२५

स्वपोषम षद्युष्मान् या पक्षिमृगशावकाः !
अद्युतच्चेन्दुना सार्धं तां प्रब्रूत गता यतः ॥२६

(एवं विलपन् रामो रावणजटायुयुद्धं राक्षशद्वययुद्धं सन्दिहानो ब्रूते—तत्रः श्नमः प्रकरणम्)— रामः—

सीतां जिघांसू सौमित्रे राक्षमावारतां ध्रुवम् ।
इदं शोणितमभ्यग्रं संग्रामेऽप्यच्युतत् तयोः ॥२८

अमह्यशोकः सौमित्रे ! पश्याद्याहं करोमि यत् ।
[1]रुणध्मि संवितुर्मार्गं भिनद्मि कुलपर्वतान् ॥३५

रिणच्मि जलधेस्तोयं विविनच्मि दिवः सुरान् ।
क्षुणध्मि सर्पान् पाताले छिनद्मि क्षणदाचरान् ॥३६

यमं युनज्मि कालेन समिन्धानोऽस्त्रकौशलम् ।
शुष्कपेषं पिनष्म्यूर्वीमखिन्दानः स्वतेजसा ॥३७

१—श्नम्प्रकरण मितः । 'रुधादिभ्यः श्नम् ३।१।७७ इति सूत्रेण श्नम् ।'

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूतिं तृणमि यक्षाणां हिनस्मीन्द्रस्य विक्रमम् ।
भनज्मि सर्वमर्यादास्तनच्मि व्योम विस्तृतम् ॥३८

न तृणेह्मीति लोकोऽयं न्ते मां निष्पराक्रमम् ।
संविद्रतां समे लोकाः पृणच्मि धनुषा शरम् ॥३९

(एवं क्रुद्धं रामं सान्त्वयन् पुनर्लक्ष्मणो ब्रूते)— लक्ष्मणः—

नात्र शोकस्त्वया कार्यः पश्य भ्रातर्जटायुषम् ।
रक्षसा युध्यमानोऽयं हतः शेते पुरो भुवि ॥४१

रामः—अये लक्ष्मण ! किमिदं 'छिद्रेषु अनर्थपरम्पराक्रमणम् ।

अहो महाननर्थोऽयं जटायुस्तु पितुः सखा ।
अस्य श्राद्धविधिः कार्यः परासोः स्वस्तुपाकृते ॥४२

भ्रातर्विचिनु काष्ठानि चितां विरचयाधुना ।
अन्त्येष्टिं पितृवत्कृत्वा मुच्येऽस्यर्णान्महात्मनः ॥४३

(इति निर्गतौ रामलक्ष्मणौ । जवनिकापातः)

[देवरूपकबन्ध-राम-संवादः पञ्चदशः १५]

(षष्ठ-सर्गगः)

(तत्र देवस्वरूपः कबन्धः शर-चाप-धारिणं रामं ब्रूते) देवः—

देवत्वं प्राप्य ते शस्त्रात् सर्वं पश्यामि राघव ।
प्रष्टव्यं पृच्छतस्तथ्यं वचनीयं ब्रवीमि ते ॥४५

१—इत एव कृत्यप्रत्ययानामधिकार आरब्धोऽस्ति । हस्तेऽष्टाध्यायीं गृहीत्वा 'तव्यत्तव्यानीयरः ३।१।९६' इत्यादि सूत्राणामुदाहरणानि द्रष्टव्यानि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(आश्चर्यनिमग्नो रामो ब्रूते) रामः—

अहो राक्षसतां हित्वा कथं त्वं देवतां गतः ?
यदि पश्यसि सर्वं चेत् कोऽभूस्त्वं पूर्वजन्मनि ॥४६

अपि च—

लभ्या कथं नु वैदेही शक्यो द्रष्टुं कथं रिपुः ।
सह्यः कथं वियोगश्च गद्यमेतत्त्वया मम ॥४७

(स हि यथा-प्रश्नमेवोत्तरयति) देवः—

अहं राम ! श्रियः पुत्रो मद्यपीत इव भ्रमन् ।
यापचर्यो मुनेः शापाज्जात इत्थमवेहि माम् ॥४८

प्रयातस्तव यस्यत्वं शस्त्रपूतो ब्रवीमि ते ।
रावणेन हृता सीता लङ्कां नीता सुगरिणा ॥४९

ऋष्यमूकेऽनवद्योऽस्ति पण्यभ्रातृवधः कपिः ।
सुग्रीवो नाम वर्योऽसौ भवता च रुविक्रमः ॥५०

तेन वह्येन हन्तासि त्वमय पुरुपाशिनाम् ।
राक्षसं क्रूरकर्माणं शक्रारिं दूरवासिनम् ॥५१

अहो यदि सोऽनवद्यस्तर्हि कथं तस्य पण्यो भ्रातृ-वध इति पृच्छसि चेत् तदपि शृणु—

आस्ते स्मरन् स कान्ताया हृताया वालिना कपिः ।
वृषो यथोपसर्पाया गोष्ठे गोदण्डताडितः ॥५२

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन सङ्गतमार्येण रामाजयं कुरु द्रुतम् ।
लङ्कां प्राप्य ततः पापं दशग्रीवं हनिष्यसि ॥५३

नहि स राजनीतिज्ञवन्मिथ्या ब्रूते व्यवहारे, किन्तु सत्य-व्यवहारी त्यपि जानातु—

अनृतोद्यं न तत्रास्ति सत्यवद्यं ब्रवीम्यहम् ।
मित्रभूयं गतस्तस्य रिपु-हत्यां करिष्यसि ॥५४

आदृत्यस्तेन वृत्येन स्तुत्यो जुष्येण सङ्गतः ।
इत्यः शिष्येण गुरुवद् गृध्यमर्थमवाप्स्यसि ॥५५

नाखेयः सागरोऽप्यन्य स्तस्य सद्भृत्यशालिनः ।
मन्युस्तस्य त्वया मार्ग्यो मृज्यः शोकश्च तेन ते ॥५६

सुराजसूययाजीव तेजसा सूर्य-सन्निभः ।
अमृषोद्यं वदन् रुच्यो द्यां गाहे त्वत्प्रसादतः ॥५७

(इत्युक्त्वाऽन्तर्हितः । रामोऽपि तद्वाक्यात्सुग्रीवान्वेषणप्रवृत्तो मध्ये शबरीं प्राप्य तां पृच्छति)

[राम-शबरी-संवादः षोडशः १६]

(षष्ठ-सर्गः)

(ततः प्रविशतो रामो राजब्रह्मचारिवेशे सलक्ष्मणः चीरजटाधारी, संन्यासिनीवेशे कषायाम्बर-दंडकमण्डलु-धारिणी शबरी च । तत्र प्रथमं रामस्तां पृच्छति)— रामः—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयि शबरि साध्वि [1]त्वममावास्या-समन्वये !
पितॄणां कुरुषे कार्यमपाक्यैः स्वादुभिः फलैः ॥६३

अवश्य-पाव्यं पवसे कच्चित्त्वं देवभाग्यविः ।
आसाद्य मध्वरे सोमं द्विजैः कच्चिन्नमस्यसि ॥६४

आचाम्यं सन्ध्ययोः कच्चित् सम्यक् ते न प्रहीयते ।
कच्चिदग्निमिवाऽऽनाय्यं काले संमन्यसेऽतिथिम् ॥६५

न प्रणाय्यो जनः कच्चिन्निकाय्यं तेऽधितिष्ठति ।
देवकार्यविघाताय धर्मद्रोही महोदये ! ६६

कुण्डपाय्यवतां कच्चिदग्नि-चित्यावतां तथा ।
कथाभी रमसे नित्य मुपचाय्यवतां शुभे ! ६७

वर्द्धते ते तपो भीरु व्यजेष्ठा विघ्ननायकान् ।
अजैषीः काम संमोहौ संप्राप्या विनयेन वा ॥६८

नाऽयस्यसि तपस्यन्ती गुरून् सम्यगतूतुषः ।
यमान्नोदविजिष्ठास्त्वं निजाय तपसेऽतुषः ॥६९

(इति वदति रामे अर्घ्यं समधुपर्कादिकम् प्रणीय शबरी राम चन्दन स्रगादिना सम्यक् सम्पूज्य तस्याग्रे प्रभूतं फलादिकं संस्थाप्य ब्रूते)— शबरी—

१—अमावस्यद न्यतरस्त्वात् ३।१।१२२ इत, आरभ्य छन्दसंत्वक्स्वा सार्वसूत्राण मुदाहरणानि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवन् ! तव सख्यस्य सुग्रीवः कारकः कपिः ।
द्रुतं द्रष्टासि मैथिल्याः कबन्धः सत्यमब्रवीत् ॥६९

मधुपर्कादिकं पुष्पं फलं किञ्चिदुपाहृतम् ।
सम्प्रसद्य गृहीत्वेदं कृतार्थयतु मां भवान् ॥७१

[पुना-रामलक्ष्मण-संवादः सप्तदशः १७]

(षष्ठ-सर्गगः)

(तत्र पूर्वं रामो लक्ष्मणं वक्ति)—

रामः—अये लक्ष्मण ! जटायोः श्राद्धं कृत्वा कबन्धकथनात् सुग्रीवान्वेषणे व्यापृता अद्य वयं पम्पापार्श्वमुपेताः शृणु—

[1]भृङ्गाली-कोकिल-क्रूङ्भिर्वाशनैःपश्य लक्ष्मण !
रोचनैर्भूषितां पम्पामस्माकं हृदयाविधम् ॥७३

परिभावीणि ताराणां पश्य मन्थीनि चेतसाम् ।
उद्भासीनि जलेजानि दुन्वन्त्यदयितं जनम् ॥७४

सर्वत्र दयिताधीनं सुव्यक्तं रामणीयकम् ।
येन जातं प्रियापाये कद्वदं हंस-कोकिलम् ॥७५

पक्षिभिर्वितृदैर्यूनां शाखिभिः कुसुमोत्किरैः !
अज्ञो यो यस्य वा नास्ति प्रियः प्रग्लो भवेन्न सः ॥७६

१—वबुलतृ चौ० ३।२।१३३ इत्यादि कर्तरि कृतोऽधिकारः प्रचलति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्वनीना मुद्धमै रेभिर्मधूनामुद्धयैर्मृशम् ।
आजिघ्रैः पुष्पगन्धानां पतगैर्ग्लपिता वयम् ॥७७

धारयैः कुसुमोर्मीणां पारयैर्बाधितुं जनान् ।
शाखिभिर्हा हता भूयो हृदयानामुदेजयैः ॥७८

ददैर्दुःखस्य माहग्भ्यो धायैरामोदमुत्तमम् ।
लिम्पैरिव तनो वातैश्चेतयः स्याज्ज्वलो न कः ॥७९

अवश्याय कणाऽस्रावाश्चारुमुक्ताफलत्विषः ।
कुर्वन्ति चित्त संस्रावं चलत्पर्णाग्र-सम्भृताः ॥८०

अवसायो भविष्यामि दुःखस्यास्य कदा न्वहम् ।
न जीवस्यावहारो मां करोति सुखिनं यमः ॥८१

दह्येऽहं मधुनो लेहै र्दावैरुग्रैर्यथा गिरिः ।
नाथः कोऽत्र स येन स्यां वताऽहं विगत-ज्वरः ॥८२

समाविष्टं ग्रहेणैव ग्राहेणैवात्तमर्णवे ।
दृष्ट्वा गृहान् स्मरन्त्येव वनान्तान् मम मानसम् ॥८३

वाताहतिचलच्छाखा नर्तका इव शाखिनः ।
दुःसहा ह्री परिक्षिप्ता कणद्भिरलिगाथकैः ॥८४

लक्ष्मणः—अयि भ्रातर्भवान् अधुना किं चिन्तयति ? आवां तु सम्प्रति सुग्रीव-निवासम् ऋष्यमूकपर्वतं सम्प्राप्तौ स्वः। पश्यतु भवान्—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकहायनसारङ्गगती आवामपि ध्रुवम् ।
लावकौ शत्रुसैन्यानामृष्यमूकमुपागतौ ॥

निकषा यं नगश्रेष्ठं व्योममायमिव स्थितम् ।
मलयं योऽधिशेतेऽद्रिं सुग्रीवः कपिकुञ्जरः ॥

(इति परस्परं संलपन्तावुभौ वि निर्गतौ, जवनिकापातः)

[कपि-राम-संवादः १८ अष्टादशः]

(षष्ठ-सर्गगः)

(तत्र कपिः संन्यासिवेशे रामलक्ष्मणौ तपस्विवेशे)

कपिः—(मतोगतम्) सुग्रीवेण युवराजेन भृशमुद्बोधितोऽस्मि—यद् गुप्तचरवेशे गत्वा चङ्क्रम्यमाणयोर्द्वयोस्तापसयोर्भावमवगच्छेति । तदिमावेव तौ इति पृच्छामि—(प्रकाशम्) समीपमुपेत्य कपि र्वक्ति— गुप्तचरभाषया—

कपिर्हनूमान्—नारायण ! नारायण ! अहो महावीरौ सुवेशौ युवां भिक्षो र्मे जिज्ञासां पूरयतम्—

बलिनावमुमद्रीन्द्रं युवां स्तम्बे-रमाविव[1] ।
व्याप्तं गुहाशयैः क्रूरैः क्रव्याद्भिः सनिशाचरैः ।
तुङ्गशैलतरुच्छन्नं मानुषाणामगोचरम् ॥९३

सत्त्वमेजय-सिंहाढ्यान् स्तनन्धयसमत्विषौ ।
कथन्नाडीन्धमान् मार्गानागतौ विषमोपलान् ॥९४

१—स्तम्बकर्णयो ०३।२।१३ इत्यत आरभ्य पूर्वगतं टाऽधिकारं परिहरन् क्रमशः खशादिकृदधिकार एव ज्ञेयः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तीर्णौ वा कथं भीमाः सरितः कूलमुद्वहाः ।
आसादितौ कथं ब्रूतं न गजैः कूलमुद्रुजैः ॥९५

(एवं पृच्छति संन्यासिवेशे तिष्ठति हनुमति रामो वक्ति)— रामः—

शृणु भिक्षो ! प्रसन्नोऽहं तव भाषणतो भृशम् ॥९६
नैवापशब्दितं किञ्चिद् बहु व्याहरता त्वया ।
मन्ये विज्ञानतोऽधीतं हृदा व्याकरणं त्वया ॥९७

आवयोः संस्तवं विद्धि त्वावामभ्रंलिहं गिरिम् ।
ऐव विद्वन् ! पितुः कामात् पान्तावन्पंपचान्मुनीन् ॥९८
अमितम्पचमीशानं सर्वभोगीणमुत्तमम् ।
आवयोः पितरं विद्धि ख्यातं दशरथं भुवि ॥९९
छलेन दयिताऽरण्याद्रक्षसाऽरुन्तुदेन नः ।
असूर्यंपश्यया मूर्त्या हृता, तां मृगयावहे ॥१००

(श्रुतरहस्यो हनूमान् आत्मानं प्रकाशयन् ब्रूते)— हनुमान्—

हनूमानहमाख्यामि बाल्यस्ति वानरो महान् ।
शमयेदपि संग्रामे सललाटन्तपं रविम् ॥१०१

उग्रंपश्येन तेनैव सुग्रीवः स ।नराकृतः ।
तस्य मित्रीयतो दूतोऽहं प्राप्तस्त्वां वशंवदः ॥१०२
प्रियंवदोऽपि नैवाऽहं ब्रुवे मिथ्या परन्तप ।
संख्या तेन दशग्रीवं निहन्तासि द्विषन्तपम् ॥१०३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाचंयमोऽहमनृते सत्यमेतद् ब्रवीमि ते।
एहि सर्वसहं मित्रं सुग्रीवं कुरु वानरम् ॥१०४
सर्वकपयशः शाखं भवन्तं कल्पशाखिनम्।
[1]नयाम्यभ्रंकषं शीघ्रं मलयं फलशालिनम् ॥१०५

(इत्युक्त्वा रामलक्ष्मणौ स्कन्धयोर्द्वयोः संस्थाप्य आकाशमवगाहमानो जगाम। इति निर्गताः सर्वे जवनिकापातः)।

[सुग्रीव-रामसंवादः १९ ऊनत्रिंशः]

(पूर्वम् सुग्रीवो रामबले सन्दिहानो वालिस्वरूपं सम्पूर्णं रामं बोधयति। तत्र सुग्रीवो युवराजवेशे श्रीरामो वाणचापभृद् ब्रह्मचारिवेशे पूर्ववत्।)

सुग्रीवः—अयि राम! पूर्वं भवान् वालिस्वरूपं जानातु। ततोऽग्रे विधेयम् विधेयम्। तथाहि।

[2]वसुन्धरायां कृत्स्नायां नास्ति वालिसमो बली।
हृदयङ्गममेतत्त्वां वदामि न पराभवम् ॥१०८
दूरगैरन्तगैर्बाणैर्भवानत्यन्तगः श्रियः।
अपि संक्रन्दनस्य स्यात् क्रुद्धः किमुत वालिनः ॥१०९
वरेण तु मुनेर्बाली संजातो दस्युहो रणे।
अवार्यप्रसरः प्रातरुद्यन्निव तमोऽपहः ॥११०

१—रामेण मारुतेर्मातृभाषाभेदेऽपि संस्कृतभाषयैव व्यवहारोऽभूत्तयैव रावणेनापीति संस्कृतभाषा तदानीन्तने काले विश्वभाषाऽसीदिति।

२—इतः संज्ञायां भृदृवृजिधारि '०३।२।४६' इत्यादि सूत्राणा मुदाहरणानि।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिप्रियत्वान्नहि मे कातरं प्रतिपद्यते ।
चेतो वालिवधं राम क्लेशापहमुपस्थितम् ॥१११

शीर्षघातिनमायातमरीणां त्वां विलोकयन् ।
यतिघ्नीलक्षणोपेतां मन्येऽहं वालिनः श्रियम् ॥११२

शत्रुघ्नान् युधि हस्तिघ्नो गिरीन् क्षिप्यन्नकृत्रिमान् ।
शिल्पिभिः [1]पाणिघैः क्रुद्धस्त्वया जय्योऽभ्युपायवान् ॥११३

आव्यङ्करण-विक्रान्तो महिषस्य सुरद्विषः ।
प्रियङ्करमिन्द्रस्य दुष्करं कृतवान् वधम् ॥११४

प्रियम्भावुकतां यातस्तं क्षिपन् योजनं मृतम् ।
स्वर्गे प्रियम्भविष्णुश्च कृत्स्नं शक्तोऽप्यवाधयन् ॥११५

(एवं वालिबलनिरूपणं कुर्वन्तं सुग्रीवं रामो वक्ति)

रामः—अये सुग्रीव ! त्वं वालिन एव बलं जानासि, सम्प्रति ममापि अस्त्रबलं पश्य—

जिज्ञासोः शक्तिमस्त्राणां तव सन्दिग्धचेतसः,
भिनद्मि प्रतिपत्त्यर्थं सप्त व्योमस्पृशस्तरून् ।
शृणु वालिपशौ वध्ये महर्त्विग्जितसाध्वसः,
अभाहि निलयं भ्रातुः सुग्रीव ! त्वं दधृग् द्रुतम् ॥

(इति गर्जन् रामः सुग्रीवं वालिना सह योद्धुं प्रैषयत् । इति निर्गतावुभौ ।)

१—उत्साह वर्द्धनाय पाणिहननं (तालिवादनम्) प्राचीना प्रथा प्रतीयते ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वालि-राम-संवादः २० विंशः

(षष्ठ-सर्गगः)

(रामबाणविद्धो वाली रामं पुरः पश्यन् जानुबलेन उपविष्ट एव तमाक्रोशति व्रणवेदनया ग्लायन्)

वाली—हा ! हा ! एवमपि मानवा भवन्ति । इति नाज्ञासिषमहम्—अहो !

मृषाऽसि त्वं हविर्याजी[1] राघवः छद्मतापसः ।
अन्यव्यासक्तघातित्वाद् ब्रह्मघ्नां पापसम्मितः ॥१२६

पापकृत् सुकृतां मध्ये राज्ञः पुण्यकृतः सुतः ।
मामपापं दुराचार ! किं निहत्याभिधास्यसि ? ॥१२७

अग्निचित्सोमसुद्राजा रथचक्रचिदादिषु ।
अनलेस्त्विष्टवान् कस्मान्न त्वयाऽपेक्षितः पिता ॥१२८

मांसविक्रयिणः कर्म व्याधस्यापि विगर्हितम् ।
मां घ्नता भवताऽकारि निःशङ्कं पापदर्शना ॥१२९

बुद्धिपूर्वं ध्रुवं न त्वा राजकृत्वा पिता खलम् ।
सहयुध्वानमन्येन योऽहिनो मामनागसम् ॥१३०

पञ्च पञ्च नखा भक्ष्या ये प्रोक्ताः कृतजैर्द्विजैः ।
कौशल्याज ! शशादीनां तेषां नैकोऽप्यहं कपिः ॥१३१

१—(करणे यजः ३,१२,१८५, इत्यादि सूत्राणामुदाहरणानि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथं दुष्टुः स्वयं धर्मं प्रजास्त्वं पालयिष्यसि ।
आत्मानुजस्य जिहेषि सौमित्रे स्त्वं कथं न वा ॥१३२

मन्ये किंजमहं घ्नन्तं त्वामक्षत्रियजे रणे ।
लक्ष्मणाधिज ! दुर्वृत्त ! प्रयुक्तमनुजेन नः ॥ १३३

(एवं गर्हयमाणं वालिनं रामोऽपि विगर्हयन्नेव वक्ति) तथाहि—

रामः—अये बालिन् शांतो भूत्वा विवेकेन मृत्युकालेऽपि तु स्वात्मदोषं चिन्तय । पश्चात्तापेनापि पापशान्तिः वदन्ति धर्मशास्त्रविदः शृणु—

रामस्त्वां वक्ति भो बालिन् ! नाऽकृतं कृतवानहम् ।
यज्ञभिः सुत्त्रभिः पूर्वैर्जरद्भिश्च कपीश्वर ! ॥१३४

तेहि जालैर्गले पाशैस्तिरश्चामुपसेदुषां ।
ऊषुषां परदारैश्च सार्धं निधनमैषिषुः ॥१३५

अहन्तु शुश्रुवान् भ्रात्रा स्त्रियं भुक्तां कनीयसा ।
उपेयिवाननूचानैर्निन्दितस्त्वं लतामृग ! ॥१३६

(ततो बाली लज्जितो भूत्वा राममनुनयन् ब्रूते-) बाली—

क्षमापये स्वकं दोषं मर्षयेस्त्वं महानसि ।
पश्चात्तपामि भगवन् रक्ष मे सुतमङ्गदम् ॥१३७

सुग्रीवं मे पुरः कुर्याः किञ्चत्तमपि बोधये ।
सम्प्रत्यागतबोधोऽस्मि तव शस्त्रप्रभावतः १३८

(इति बालिवचः श्रुत्वैव तत्रस्थः सुग्रीवो रामसङ्कल्पमासादयन् बालिपुरो भवति । बाली तमनुशास्ति सम्बोधयन्—) बाली—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अये सुकण्ठ ! श्रृणु मे ब्रुवे सद्भावमागतः ।
सम्भविष्याव एकस्यामभिजानासि मातरि ॥१३९

अवसाव नगेन्द्रेषु यत् पास्यावो मधूनि च ।
अभिजानीहि तत्सर्वं बन्धूनां समयो ह्ययम् ॥१४०

दैवं न विदधे नूनं युगपत् सुखमावयोः ।
शश्वद् बभूव तद् दुःस्थं यतो न इति हाऽनुज !
हिरण्मयीं गृहाणेमां मालां दयितया सह ।
राज्यं सर्वं तथा भोगानहं स्वर्गं समाश्रये ॥

(इत्युक्त्वा बाली जोषमुपैति । सुग्रीवस्तत्पादयोः पतति)
इति जवनिकापातः ।

इति श्रीभट्टिमहाकाव्यसारे संवादात्मके तृतीयः सर्गः ।

[रामलक्ष्मण सवाद एकविंशः २१]

सप्तम-सर्गः

(तत्र माल्यवति पर्वते वर्तमानो रामो द्योतनं चंद्रं विलोक्योपस्थितां शरदं ज्ञात्वा सुग्रीवाय विषयासक्ताय विस्मृत-प्रत्युपकाराय स्वोग्रां राजनीतिं विवृण्वन् लक्ष्मणं प्रेषयति तं सुमार्गमानेतुम्) रामः—

सौमित्रे ! द्योतनं चन्द्रं वर्द्धनं शरदो भृशम् ।
पश्य दन्द्रमणान् हंसान् अरविन्द-समुत्सुकान् ॥१५

१—अनुदात्तेतश्च ०३।२।१४९ इति सूत्रादारभ्य युजादि प्रत्ययानामुदाहरणानि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपिश्चङ्कमणोऽद्यापि नाऽसौ भवति गर्द्धनः ।
कुर्वन्ति कोपनं तारा मण्डना गगनस्य माम् ॥ १६
नाऽवैत्याप्यायितारं किं कमलानि रविं कपिः ।
दीपितार दिनारम्भे निरस्तध्वान्त-सञ्चयम् ॥१७
अतीते वर्षुके काले प्रमत्तः स्थायुको गृहे ।
गामुको ध्रुवमध्वानं सुग्रीवो बालिना गतम् ।१८
जल्पाकीभिः सहासीनः स्त्रीभिः प्रजविना त्वया ।
गत्वा लक्ष्मण! वक्तव्यो जयिना निष्ठुरं वचः १९
शैले विश्रयिणं क्षिप्रमनादरिणमभ्यमी ।
न्याय्यं परिभवी ब्रूहि पापमव्यथिनं कपिम् ॥२०
स्पृहयालुं कपिं स्त्रीभ्यो निद्रालुमदयालुवत् ।
श्रद्धालुं भ्रामरं धारुं सद्रुमद्रौ वद द्रुतम् २१

लक्ष्मणः—(एवं ब्रुवति क्रुद्धे रामे समुत्साहयन् लक्ष्मणो ब्रूते)

सूमरो भङ्गुराप्रज्ञो गृहीत्वा भासुरं धनुः
विदुरो जित्वरो भ्रातर्द्रागेमि गत्वरान् कपीन् ॥२२

(इति लक्ष्मणो निर्गतो रामस्तत्रैव तिष्ठति । जवनिकापातः)

(सुग्रीवलक्ष्मण-संवादः द्वाविंशः २२]

सप्तमः सर्गः

(क्रुद्धं तदीयान्तः पुरे समुपस्थितं लक्ष्मणं सुग्रीवः सान्त्वयन् ब्रूते)
सुग्रीवः—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहं स्वप्नक्[1] प्रसादेन तव बन्दारुभिः सह ।
अभीरुरवसं स्त्रीभिर्भासुराभिरिहेश्वरः ॥२५

विद्युन्नाशं रवेर्भासं विभ्राजं शशलाञ्छनम् ।
रामप्रत्तेषु भोगेषु नाहमज्ञासिषं रतः ॥२६

एष शोकच्छिदो वीरान् प्रभो ! सम्प्रति वानरान् ।
धरा-शैल-समुद्राणामन्तगान् प्रहिणोम्यहम् ॥ २७

लक्ष्मणः--यदि सत्यं हृदयात्कथयसि ? तर्हि—

अस्तु, राघवकार्यं चेत्कारुस्त्वं वानरेश्वर !
सर्व-वानरसेनानामाश्वागमनमादिश ! ॥२८

सुग्रीवः— अये सुहृल्लक्ष्मण ! पश्य पश्य —

वयमद्यैव गच्छामो रामं द्रष्टुं त्वरान्विताः ।
कारका मित्रकार्याणि सीतालाभाय वानराः ।२९

(इति रङ्गान्निर्गतः । जवनिकापातः)

सुग्रीव-सेना संवादः २३

सप्तमः सर्गः

(सुग्रीवो रामपार्श्वे तिष्ठन् ससन्नाहं पंक्तिबद्धं प्रास्थानिकवेशे स्थितं स्वसैन्यमुपदिशति । अये सैनिकाः शृणुत मे वचः सावधानाः—
सुग्रीवः—

१—स्वपि-तृषोर्नजिङ ३।२।१७२ इत्यतः प्रत्ययानां क्रमश उदाहरणानि

(द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् ।
कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम् ।)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यात[1] यूयं यम-श्रायं दिशं नायेन दक्षिणाम् ।
विक्षावैस्तोय-विश्रावं तर्जयन्तो महोदधेः ॥३६

उन्नावानधिगच्छन्तः प्रद्रावैर्वसुधाभृताम् ।
वनाभिलावान् कुर्वन्तः स्वेच्छया चारुविक्रमाः ॥३७

सदोद्गार—सुगन्धीनां फलानामलमाशिताः
उत्कारेषु च धान्यानामनभीष्ट-परिग्रहाः ॥३८

संस्तावमिव श्रृण्वन्तश्छन्दोगानां महाध्वरे ।
शिञ्जितं मधुलेहानां पुष्प-प्रस्तार-शायिनाम् ॥३९

आलोचयन्तो विस्तारमम्भसां दक्षिणोदधेः ।
स्वादयन्तः फलरसं मुष्टिसंग्राहपीडितम् ॥४०

न्याय्यं यद् यत्र तत्कार्यं पर्यायेणाविरोधिभिः ।
निशोपशायः कर्तव्यः फलोच्चायश्च संहतैः ॥४१

सीता रक्षो-निकायेषु स्तोककायैः छलेन च
मृग्या शत्रु-निकायानां व्यावहासी-मनाश्रितैः ॥४२

(इतिकुलकसमाप्तिः)

सांराविणं न कर्तव्यं यावन्नायाति दर्शनम् ।
संदृष्टायां तु वैदेह्यां निग्राहो वोऽर्थवानरैः ॥४३

सेनापतिः—(अङ्गदोऽग्रे भूत्वा) अयि प्रभो! भवदादेशं प्राणपणेन पालयन्तो वयम्—

१—इतः श्रिणीभुवोऽनुपसर्गे ३।३।२४ इत्यादि सूत्राणामुदाहरणानि क्रमेण ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवग्राहे यथावृष्टिं प्रार्थयन्ते कृषीवलाः ।
प्रयामाद्य तथा सीतां सर्वथा प्रार्थयामहे ॥

(इत्युक्त्वा सर्वे रामपार्श्वे गता जवनिकापातः)

[राम-हनुमत्-संवादः चतुर्विंशः २४]

सप्तम-सर्गगः

(रामः—पूर्वं प्राप्तान् सुग्रीवादेशात् प्रास्थानिक - वेशे स्थितान् सैनिकान् स्मारयन् शास्ति)

रामः—अये हनुमन् सुग्रीवादेशेन सीतामन्विष्य भवन्तः प्राप्तायां तस्यामिदमभिज्ञानं तस्यै देयम् । शृणुत यूयम्—

अवग्राहे यथा वृष्टिं प्रार्थयन्ते कृषीवलाः ।
प्रार्थयध्वं तथा सीतां यात सुग्रीवशासनात् ॥४८

वणिक् प्रग्राहवान् यद्वत्काले चरति सिद्धये ।
देशापेक्षस्तथा यूयं याताऽदायाङ्गुलीयकम् ॥४९

अभिज्ञान त्वया वह्यं हनूमन् ! प्राणसम्मितम् ।
प्राप्तायां किल वैदेह्यां दत्त्वा ग्राह्यं ततोऽपि तत् ॥५०

हनुमान्:—(अग्रे भूत्वा)

प्रभो गृहीत्वाऽभिज्ञानं वयं यामो नभस्थलम् ।
वाजिनः स्यन्दने भानोर्विमुक्तप्रग्रहा इव ॥५१

(इति निर्गताः सर्वे, जवनिकापातः)

[अङ्गद-स्वयंप्रभा-संवादः २५ पञ्चविंशः]

(सप्तम-सर्गगः)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(सीतामन्वेषयन्तः कपयः स्थानभ्रष्टाः क्वापि स्थले प्राप्ताः। तत्रोद्यानरक्षिकया स्वयंप्रभया कृतातिथ्या विश्रान्ताश्च ततः पश्चादङ्गदस्तां पृच्छति)— अङ्गदः—

रक्षणं[1] करोषि कस्मात्त्वं यत्नेनाख्यायतां शुभे !
स्वप्ने निधिवदाभाति तव सन्दर्शनं हि नः ॥६६

स्वयंप्रभा—(उत्तरयति)—

शृणु वालिज ! जिज्ञासां तेऽधुना पूरयाम्यहम् ।
इयं दानवराजस्य पूः सृष्टिर्विश्वकर्मणः ॥६७

निहतः स स्थितिं भिन्दन् दानवेशो बलद्विषा ।
दुहिता मेरुसावर्णेरहं नाम्ना स्वयंप्रभा ॥६८

जूतिमिच्छथ चेत् तूर्णं कीर्तिं वा पातुमात्मनः ।
करोमि वो बहिर्यूतीन् पिधध्वं पाणिभिर्दृशः ।

(ततोऽङ्गदस्तदाज्ञां पालयन्नुत्तरयति)

अङ्गदः—

अहो व्रज्यावतीं प्राप्य त्वां कल्याणि ! शुचिस्मिते !
पिदधाम वयं नेत्रे कुर्वस्मांस्त्वं बहिर्गतान् ॥

(इत्येवं पिहिताक्षास्ते बहिर्गता जवनिकापातः)

[सम्पाति-कपिसंवादः २६ षड्विंशः]

सप्तम-सर्गः

१—'यज याच ०३।३।९० इत्यादीनामुदाहरणानि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(गुहातो बहिर्भूतान् प्रायोपवेशनपरान् जटायुं स्तुवतस्तान् सम्पातिर्वक्ति) सम्पातिः—

अये जटायुभ्राताऽहं सम्पातिर्नाम वानराः !
के यूयं दुरुपस्थाने[1] मनसाऽप्यद्रिमूर्द्धनि ॥८५

आत्मानं परिदेवध्वे कुर्वन्तो रामसंकथाम् ।
समानोदर्य्यमस्माकं जटायुं च स्तुथादरात् ॥८६

(ततोऽङ्गदस्तदुत्तरं दददात्मानं परिचाययति) अङ्गदः—

अये जटायुसोदर्य ! शृणु तथ्यं वचो मम ।
वयं शत्रुलवित्रेषोर्दूता रामस्य भूपतेः ॥८७

केनापि दौष्कुलेयेन कुल्यां माहाकुलीं प्रियाम् ।
हृतां महाकुलीनस्य तस्य लिप्सामहे वयम् ॥८८

त्रिंशत्तममहर्यातं मत्वा प्रत्यागमावधिम् ।
अकृतार्था विषीदन्तः परलोकमुपास्महे ॥८९

म्रियामहे न गच्छामः कौशल्यायनिवल्लभाम् ।
उपलम्भ्यामपश्यन्तः कौमारीं पततां वर ! ॥९०

(ततः सम्पातिः कपीन् धर्मं शिक्षयन्नुत्तरयति) सम्पातिः—

अये हितमहं वच्मि नाध्यगीढ्वं[2] ध्रुवं स्मृतिम् ।
यूयम् संकुटितुं यस्मात् कालेऽस्मिन्नध्यवस्यथ ॥९१

१—'आतो युच् ३।३।१२८ इत्यादि प्रकीर्णकप्रत्ययोदाहरणानि ।

२—'गाङ्कुटादिभ्योऽणिन् ङित् १।२।१ इत्याद्युदाहरणानि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाऽयमुद्विजितुं कालः स्वामिकार्याद्भवादृशाम् ।
हृतभार्य्ये च्युते राज्याद्रामे पर्युत्सुके भृशम् ॥९२

यत्नं प्रोर्णवितुं तूर्णं दिशं कुरुत दक्षिणाम् ।
प्रोर्णुवित्रीं दिवस्तत्र पुरीं द्रक्ष्यथ काञ्चनीम् ॥९३

(कलापकम्)

लङ्कां नाम्ना गिरेर्मूर्ध्नि राक्षसेन्द्रेण पालिताम् ।
निर्जित्य शक्रमानीता ददृशुर्यां सुरस्त्रियः ॥९४

बभूव याऽधिशैलेन्द्रं मृदित्वेवेन्द्र - गोचरम् ।
कुषित्वा जगतां सारम् सैका शङ्के कृता भुवि ॥९५

अमृडित्वा सहस्राक्षं क्लिशित्वा कौशलैर्निजैः ।
उदित्वाऽलं चिरं यत्नात्सैका धात्रा विनिर्मिता ॥९६

मुषित्वा धनदम् पापो यां गृहीत्वाऽवसद् द्विषन् ।
तां रुदित्वेव शक्रेण यात लङ्कामुपेक्षिताम् ॥९७

विदित्वा शक्तिमात्मीयां रावणं विजिघृक्षवः ।
उक्तं प्रिपृच्छिषूणां वो मा स्म भूत सुषुत्सवः ॥९८

नाविविदिषुमभ्येति सम्पद्रुरुदिषुम् नरम् ।
किं मुमुषिवद्यातं द्विषो नापचिकीर्षया ॥९९

बुभुत्सवो द्रुतम् सीतां भुत्सीध्वं प्रब्रवीमि वः ।
मा च भुद्ध्वं मृषोक्तं नः कृषीढ्वं स्वामिने हितम् ॥१००

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

समगच्छं पुरः शत्रोर्मोदयध्वं रघूत्तमम् ।
नोपायध्वं भयं सीतां नोपायंस्त दश ननः ॥१०१

(ततः प्राप्तोत्साहोऽङ्गदः स्वसैन्यं परामर्क्ष्यति) अङ्गदः—

सम्पाते[1] ! ते शुभाद्वाक्याद्वयमुत्साहिताः समे ।
परामृश्याशु गन्ताऽसौ योऽस्मासु स्यात्समर्थितः ॥

(इति सर्वे निर्गताः, जवनिकापातः)

[मैनाकाद्रि-कपि-संवादः सप्तविंशः २७]

अष्टम-सर्गगः

(समुद्रं गाहमाने हनूमति मध्येसमुद्रं समुत्थितो मैनाकाद्रि र्हनुमन्तं वक्ति--तत्र हनूमान् सैनिकवेशेऽचलः स्ववेशे) मैनाकाद्रिः—

खम्पराजयमानोऽहमुन्नत्या[2] पवनात्मज !
प्रेम्णा वच्मि विजेष्ठा मयि विश्रम्य वैरिणम् ॥९

फलान्यादत्स्व चित्राणि परिक्रीडस्व सानुषु ।
साध्वनुक्रीडमानानि पश्य छन्दानि पक्षिणाम् ॥१०

क्षणं भद्राव्रतिष्ठस्व ततः प्रस्थास्यसे पुनः ।
न तत् संस्थास्यते कार्यं दक्षेणोरीकृतन् त्वया ॥११

त्वयि नस्तिष्ठते प्रीतिस्तुभ्यं तिष्ठामहे वयम् ।
उत्तिष्ठमानम् मित्रार्थे कस्त्वां न बहु मन्यते ॥१२

१—'अनापृष्टो हितं ब्रूयादनाहूतोऽध्वरं व्रजेद्' इति शिक्षयति संवादोऽयम् ।
२—विपराभ्यां जेः १।३।१८ इत्यादि सूत्राणां क्रमश उदाहरणानि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये सूर्यमुपतिष्ठन्ते मन्त्रैः सन्ध्यात्रयं द्विजाः ।
रक्षोभिस्तापितास्तेऽपि सिद्धिं ध्यायन्ति तेऽधुना ॥१३

अव्यग्रमुपतिष्ठस्व वीर ! वायोरहम् सुहृत् ।
रविर्वितपतेऽत्यर्थमाश्वस्य मयि गम्यताम् ॥१४

तीव्र मुत्तपमानोऽय मशक्यः सोढुमातपः ।
आघ्नान इव संदीप्तैरलातैः सर्वतो मुहुः ॥१५

संशृणुष्व कपे ! मत्कैः सङ्गच्छस्व वनैः शुभैः ।
समारन्त ममाभीष्टाः संकल्पास्त्वय्युपागते ॥१६

के न संविद्रते वायो मैनाकाद्रिर्यथा सखा[1] ।
यत्नादुपाह्वये प्रीतः संह्वयस्व विवक्षितम् ॥१७

(ततो हनूमान् श्रद्धावनतो मैनाकं प्रणमन् उत्तरयति) हनूमान्-

द्यामिवाह्वयमानं त्वामुपकुर्वन्तमादरात् ।
प्रार्थये प्रणमन् तात ! प्रकुर्वाणोऽनुजीविवत् ॥१८

कुलभार्यां प्रकुर्वाणमहम् द्रष्टुं दिशाननम् ।
यामि त्वरायां शैलेन्द्र ! मा कस्यचदुपस्कृथाः ॥१९

योऽपचक्रे वनात् सीतामधिचक्रे न यं हरिः ।
विकुर्वाणः स्वरानद्य बलं तस्य निहन्म्यहम् ॥२०

१—'उपकृतः प्रत्युपकुर्याद' इति नीतिं शिक्षयति मैनाकः' 'कर्मकर्तुः क्व विश्रामः इति मारुतिः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विकुर्वे नगरे तस्य पापस्याद्य रघुद्विषः ।
विनेष्ये वा प्रियान् प्राणान् उदानेष्येऽथवा यशः ॥२१

विनेष्ये क्रोधमथवा क्रममाणोऽरि-संसदि ।
त्वमाजानीहि मां तात ! यथा रवेऽहम् पराक्रमे ॥२२

(इति हनूमान निर्गतो मैनाकस्तत्रैव तिष्ठति जवनिकापातः)

[लङ्कायामशोकोपवने रावण-सीता-संवादोऽष्टाविंशः २८]

(अष्टम-सर्गः)

(तत्र राजवेशे बहुस्त्री-वरिवृतो रावणो भूमिष्ठैकवेणिधरां कृशां मलिनाम्बरां सीतां ब्रूते)— रावणः—

[1]संक्रुध्यसि मृषा किं त्वं दिदृक्षुं मां मृगेक्षणे !
ईक्षितव्यं पर-स्त्रीभ्यः स्व-धर्मो रक्षसामयम् ॥७६

शृण्वद्भ्यः प्रतिशृण्वन्ति मध्यमा भीरु ! नोत्तमाः ।
गृणद्भ्योऽनुगृणन्त्यन्येऽकृतार्था नैव मद्विधाः ॥७७

इच्छ स्नेहेन दीव्यन्ती विषयान् भुवनेश्वरम् ।
संभोगाय परिक्रीतः कर्तास्मि तव नाप्रियम् ॥७८

आस्स्व साकम् मया सौधे माऽधिष्ठा निर्जनं वनम् ।
माऽधिवात्सीर्भुवं शय्यामधिशेष्व स्मरोत्सुका ॥७९

अभिन्यविक्षथास्त्वं मे यथैवाऽव्याहता मनः ।
तवाप्यध्यावसन्तं मां मा रौत्सीर्हृदयम् तथा ॥८०

१—क्रुध द्रुहोरुपसृष्टयोः कर्म १।४।३८, इत्यादिसूत्राणां क्रमश उदाहरणानि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

माऽवमंस्था नमस्यन्तमकार्यज्ञे जगत्पतिम् ।
सन्दृष्टे मयि काकुत्स्थमधन्यां कामयेत का ॥८१

यः पयो दोग्धि पाषाणं स रामाद्भूतिमाप्नुयात् ।
रावणं गमय प्रीतिं बाधयन्तम् हिताहितम् ॥८२

प्रीतोऽहम् भोजयिष्यामि भवतीं भुवनत्रयम् ।
किं विलापयसेऽत्यर्थं पार्श्वे शायय रावणम् ॥८३

आज्ञां कारय रक्षोभि र्मा प्रियाण्युपहारय ।
कः शक्रेण कृतं नेच्छेदधिमूर्द्धानं मञ्जलिम् ॥८४

(इत्युपरमति चाटुकारितां प्रदर्शयन् । ततोऽतिक्रुद्धा निर्भयोद्दीप्ता सीता ब्रूते पापानुवसितं रावणम्) सीता–

न त्वं पापानु रामं[1] चे, दुप शूरेषु वा ततः ।
अपवाह्य च्छलाद्वीरौ किमर्थं मामिहाऽहरः ॥८६

अपशूरं न ते वृत्तं कथं रात्रिञ्चराधम ?
यत् सम्प्रत्यपलोकेभ्यो लङ्कायां वसतिर्भयात् ॥८७

आ रामदर्शनात् पाप ! विद्योतस्व स्त्रियः प्रति ।
सद्वृत्तानन्नु दुर्वृत्तः पर–स्त्रीं जातमन्मथः ॥८८

अभिद्योतिष्यते रामो भवन्तमचिरादिह ।
उद्गूर्णबाणः संग्रामे यो नारायणतः प्रति ॥८९

१–'हीने १।४।३८' इत्यादि सूत्रैः क्रमशोहि कर्म प्रवचनीयत्वे 'कर्म प्रवचनीययुक्ते द्वितीया २।३।८' इति सर्वत्र द्वितीया ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुतोऽधिगास्यसि क्रूर ! निहतस्तेन पत्रिभिः ।
न सूक्तं हि त्वयाऽत्युग्रमतरामं मदोद्धत ! ॥९०

परिशेष न नामापि स्थापयिष्यति ते विभुः ।
अपि स्थाणुं जयेद्रामो भवतो ग्रहणं कियत् ॥९१

अपि स्तुह्यपि सेधास्मांस्तथ्यमुक्तं नराधम !
अपि सिञ्चेः कृशानौ त्वं दर्पं मय्यपि योऽभिक्रः ॥९२

अभिरामे पराक्रान्त मभिकर्ता स ते क्षयम् ।
अमर्याद ! तृणाय त्वां मन्ये नाग्रे वदाम्यहम्[1] ॥९३

(इति तूष्णींभूतां सीता मन्तरा तर्जयन् रावणः खड्ग मुद्यम्य क्रुद्धो ब्रूते)— रावणः—

चिरेणानुगुणं प्रोक्ता प्रतिपत्ति-पराङ्मुखी ।
न मासे प्रतिपत्तासे मां चेन्मन्यसि मैथिलि ! ॥९५

(राक्षसीणामभिमुखो भवन्)।

भयानि दत्त मैथिल्यै यूयं मर्त्या मदाज्ञया ।
राक्षस्यो यद् भयात्सीता वृणुयान्मां समादृता ॥९६

(इति चन्द्रहासं नर्तयन्निर्गतः। जवनिकापातः)

[तत्रैव त्रिजटाराक्षसी-संवाद ऊनत्रिंशः २९]

अष्टम-सर्गः

(तत्र राक्षस्यो रावणाज्ञया सीतां तर्जयन्ति)। तथाहि—

१—'सतीनां न भयं क्वचित्' 'चरित्रं सर्वथा यत्नाद् गोपायन्ति कुलस्त्रियः,' इत्यादि शिक्षयति संवादो विषयदृष्ट्या ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राक्षस्यः—अयि सीते वयं सर्वा हितं ते ब्रूमहे शृणु—

रावणाय[1] नमस्कुर्याः स्यादित्थं स्वस्ति ते ध्रुवम् ।
अन्यथा प्रातराशाय कुर्याम त्वामलं वयम् ॥९७

(इत्येवं ब्रुवतीस्तास्त्रिजटा स्वयमप्रेरितैव मध्ये सीतापक्षतो ब्रूते)

आत्मानं हत दुर्वृत्ताः स्वमांसैः कुरुताशनम् ॥९८

अन्यच्च शृणुत कर्णौ स्फारीकृत्य—

अद्य सीता[2] मया दृष्टा सूर्यं चन्द्रमसा सह ।
स्वप्ने स्पृशन्ती मध्येन-तनु श्यामा सुलोचना ॥१००

इतो युष्माकमेव स्याद्वधोऽग्र -इति तर्कये ।
यूयं तस्मात्पलायध्वं सीताधर्षणतो द्रुतम् ॥१०१

(ततो राक्षस्यः परस्परम् ब्रुवन्ति) राक्षस्यः—

वक्त्येषा त्रिजटाऽप्येवं किं स्यादग्रे न निश्चितम् ।
शयनावसरोऽस्माकं व्रजाम शयनाय हि ॥१०२

(इति सर्वा निर्गताः। जवनिकापातः)

[कपि-सीता-संवादः त्रिंशः ३०]

(अष्टम-सर्गः)

(तत्राशोकोपवने तरुस्थः कपिः सीतां श्रावयन् रामं प्रशंसति तथाहि)— कपिः—

१—अत्र रावणं प्रसादयितुमित्यर्थे उपपदविभक्तेः कारकविभक्तिर्बलीयसी इत्यस्यापवादिका 'क्रियार्थोपपदस्य ०२।३।१४ इति चतुर्थी ।

२—यदा कर्मसु कार्य्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने इति सीताभ्युदयः सूच्यतेऽनेन ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो रामो महाबाहुः कीदृग्वीरः प्रतापवान् ।
एकाक्येव पदातिर्यश्चतुर्दशशतं क्रुधा ॥१०३

जघान राक्षसान् सर्वान् मामिह प्रैषयत्तथा ।
अवरुह्य[1] तरोर्यानि सीता-देव्याः पुरोऽधुना ॥१०४

(इति रामं स्तुवन्तं वृक्षादवतरन्तं कपिं वीक्ष्य सीता मनसि ब्रूते)

सीता—(मनसि) कोऽयं ममात्मानमहो विकर्षति,
ज्वलत्प्रताप-स्ववपुः – प्रकर्षतः ।
मन्ये प्रियेणेह मम प्रणोदित-
त्स्यादेष सन्देशहरो महाकपिः ॥ (क १०४)

(प्रकाशं तरोरवतरन् कोऽसि-वद वानरविग्रह !!
न हि त्वां रावणं मन्ये विश्वासयसि मां यतः । (ख १०४) ।

पूर्वस्मादन्यवद् भासि भावाद्दादशरथिं स्तुवन् ।
ऋते क्रौर्यात्समायातो मां विश्वासयितुं नु किम् ॥१०५

इतरो रावणादाहो ! राघवानुचरो भवान् ।
सफलानि निमित्ता न प्राक् प्रमातात्ततो मम ॥१०६

उत्तरादि वसन्त्रामः समुद्राद्रक्षसां पुरम् ।
अवैल्लवणतोयस्य स्थितां दक्षिणतः कथम् ॥१०७

१—'अनभिहिते २।३।१' इत्यधिकारे 'अपादाने पञ्चमी २।३।२८' इत्यादि-सूत्राणां क्रमशः उदाहरणानि । अत्र हनूमान् संस्कृतभाषामाश्रित्यैव सीता मुक्तवान् । राक्षसैर्युद्धेऽपि 'जयत्यतिबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः ।' इत्यादि श्लोक-चतुष्टयस्य विजयसाधकस्य सम्पुटप्रतीकस्योच्चारणतोऽपि प्रतीयते यद्धनूमान् संस्कृतेनैव वचसा रामेण सह लंकायां च सर्वत्र व्यवाहरत् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डकान् दक्षिणेनाहं सरितोऽद्रीन् वनानि च ।
अतिक्रम्याम्बुधिं चैव पुंसामसमाहता ॥१०८
पृथङ् नभस्वतश्चाहं वैनतेयेन वा विना ।
गन्तुमुत्सहते नेह कश्चित् किमुत वानरः ॥१०९
(इत्येवं चिन्तयन्त्यां सीतायां कपिस्तत्पुरो भवन् वक्ति)– कपिः–
कथं चिन्तयसि प्राज्ञे रामप्रेष्योऽस्मि मारुतिः ।
तवैव किंकरो मां त्वं कपिं विद्धि न रावणम् ॥११०
अये महाराज्ञि चिरात् स्थितोऽहं व्यलोकिषम् रावणदुर्विचेष्टाम् ।
गतेऽथ तस्मिन्ननु लब्धवेलो वचः समाशंसि तवेक्षणाय ॥११०(क)
विप्रकृष्टं महेन्द्रस्य न दूरं विन्ध्यपर्वतात् ।
नाऽनभ्यासे समुद्रस्य तव मान्यवति प्रियः ॥१११
असम्भ्रमे दशग्रीवे प्रविष्टोऽहमिदं वनम् ।
तस्मिन् प्रतिगते द्रष्टुं त्वामुपाक्रंस्यचेतितः ॥११२
तस्मिन् वदति रुष्टोऽपि नाकार्षं देवि ! विक्रमम् ।
अविनाशाय कार्यस्य विचिन्वानः परापरम् ॥११३
वानरेषु, कपिः स्वामी नरेष्वधिपतेः सखा ।
जातो रामस्य सुग्रीवो यस्य दूतोऽहमागतः ॥११४
अपि च—
ईश्वरस्य विशाटानां विलोक्य निखिलां पुरीम् ।
कुशलोऽन्वेषणस्याहमायुक्तो दूतकर्मणि ॥११५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शनीयतमाः पश्यन् स्त्रीषु दीव्याम्वपि स्त्रियः ।
प्राप्तो व्यालतमान् व्यस्यन् भुजङ्गेभ्योऽपि राक्षसान् ॥११६
भवत्यामुत्सुको रामः प्रसितः सङ्गमेन ते ।
मयासु कृतनिर्वापः पितृभ्यो मां व्यसर्जयत् ॥११७
धत्स्व मैथिलि भिज्ञानं काकुत्स्थस्यांगुलीयकम् ।
भवत्याः स्मरणाऽत्यर्थमर्पितं सादरं मम ॥११८

अन्यच्च—

रामस्य दयमानोऽसावध्येति तव लक्ष्मणः ।
उपाकृष्णानां राजेन्द्रावागमय्येह मां त्रसाः ॥११९
राक्षसस्येह रोचन्ते कृपया भीमविक्रमाः ।
धृत्या नाथस्य वैदेहि ! मन्योरुज्जासयात्मनः ॥१२०

अपरञ्च—

राक्षसानां मयि गते रामः प्रक्षिहनिष्यति ।
प्राणानामपशिष्टाऽयं रावणस्त्वामिहानयन् ॥१२१
अदेवीद् बन्धुभोगानां प्रादेशादात्मसंपदम् ।
शतक्रतुस्तवैकस्य स्मरत्यह्नो रघूत्तमः ॥१२२
तवोपशायिका यावद्राक्षस्यश्चेतयन्ति नो ।
प्रति सन्दिश्यतां तावद्भर्तुः शार्ङ्गस्य मैथिलि ॥१२३

(इति ब्रुवति मारुतौ प्रसन्नाश्चर्यमग्ना सीता वक्ति)— सीता—

पुरः प्रवेश आश्चर्यमहो शाखामृगस्य ते ।
रामस्य सम्मतो दूतो सखा प्राणप्रदोऽसि मे ॥१२४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(इन्द्रवज्रया) चूडामणिं मे प्रतिगृह्य याया,
वाच्यो मदीयः प्रियकृत्स रामः।
एतस्य रक्षां त्वरितं विदध्या—
द्धर्तार माहत्य समूलघातम्।
रामस्य शयितं भुक्तं जल्पितं हसितं स्थितम्।
उक्तवानसि मत्तोऽपि चूडामणिमिमं नय ॥१२५

(इति चूडामणिमर्पयति सीता मारुतिस्तं गृह्णन् पुनर्वक्ति) मारुतिः—

तवाज्ञा चेत्फलं भुंक्ते राक्षसेन्द्र-बलं विदन्।
रामपार्श्वे वदिष्यामि कथं रावणसंस्थितिम् ॥१२६
कृत्वा कर्म यथादिष्टं पूर्वकार्याऽविरोधि यः।
करोत्यभ्यधिकं कृत्यं तमाहुर्दूतमुत्तमम् ॥१२७
भवतीं दृष्टवान् कर्म कृत्वाऽन्यैरपि दुष्करम्।
यशो यास्याम्युपादाय वार्तामाख्यायकः प्रभोः ॥१२८
राक्षसेन्द्रस्य संरक्ष्यं मया लक्ष्यमिदं वनम्।
सदृशं नन्दनस्येति यदि ते रोचतेऽधुना ॥१२९
राघवाभ्यां शिवं दूतस्तयोरहमिति ब्रुवन्।
हितो भनज्मि रामस्य कः किं ब्रूतेऽत्र राक्षसः ॥१३०

(इत्युक्त्वा विरते हनूमति शनैः सीता ब्रूते)— सीता—

यद् यदिच्छसि तत्कृत्वा द्रुतं गच्छेति मे मतिः।
कृतवान् दुष्करं कर्म सर्वं त्वं साधयिष्यसि ॥१३१

(इति सीतां प्रणमन् मारुतिर्निष्क्रान्तः। जवनिकापातः)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[रावण-रावणि-संवाद एकत्रिंशः ३१]

नवम-सर्गगः

(हनूमताशोकवनोपभङ्ग प्रारब्धे व्यग्रो रावणो रावणिमाहूय तमुपदिशति। तत्र राक्षसेन्द्रवेशे रावण इन्द्रजित्स्ववेशे खड्गधनुर्बाणधारी) तथाहि— रावणः—

इन्द्रजित् त्वं मया दृष्टो बहुधाऽसि न संशयः।
वने मत्त इव क्रुद्धो गजेन्द्रः प्रधनेष्वटन् ॥४६

[1]ययाथ त्वं द्विषामन्तं भूयो यातासि चासकृत्।
शशक्थ जेतुं त्वं देवान् मायाः सस्मर्थ सयति ॥४७

त्वं ससर्जिथ शस्त्राणि दद्रष्ठारींश्च दुःसहान्।
शस्त्रैरादिथ शस्त्राणि त्वमेव महतामपि ॥४८

स त्वं हनिष्यन् दुर्बुद्धिं कपिं व्रज ममाज्ञया।
मा नाज्ञो राक्षसीर्मायाः प्रस्तावीर्मा न विक्रमम् ॥४९

मा न सावीर्महास्त्राणि मा न धावीररिं रणे।
वानरं मा न संमंसीर्व्रज तूर्णमशङ्कितः ॥५०

(तमुत्तरयन् रावणिः स्वात्मानं प्रशंसति तथाहि)— रावणिः—

संसिष्मयिषमाणोऽहं मायां व्यञ्जिजिषुर्द्विषः।
जगत्पिषविषुर्यामि कल्पान्त इव मारुतः ॥५१

१—क्रादिनियमात्प्राप्तस्येटः 'अचस्ता स्वत्थल्यनिटो नित्यम् ७।२।६१ इतीट् प्रतिषेधः। एवमेवाग्रेऽपीड् व्यवस्था क्रमेण सप्तमाध्यायद्वितीयपादीयपाणिनीयाष्टकसूत्राणामेवोदाहरणानीह ज्ञेयानि। विषय-दृष्ट्या हनूमता सह योद्धुमिन्द्रजिदुपागत इत्यतिबलत्वं तस्य सूच्यते।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकानाशिशिषोस्तुल्यः कृतान्तस्य विपर्यये ।
वने विकरिषोर्वृक्षान् बलं जिगरिषुः कपेः ॥५४
रोदिष्यन्ति मयि प्राप्ते शुचा पक्षिगणाः समे ।
मुक्तकण्ठं हतान् वृक्षान् बन्धून् बन्धोरिवागमे ॥५५
आश्वसिष्यति मां प्राप्य मद्वेग-पवनाहतम् ।
विचित्र - स्तबकोद्भासि वनं लुलित-पल्लवम् ॥५६
(इत्युक्त्वा निर्गतः । जवनिकापातः) ।

[रावण-विभीषण-संवादो-द्वात्रिंशः ३२]

नवम-सर्गगः

(अशोकवनोपभञ्जनान्ते निगृहीतं हनुमन्तं हन्तुं क्रुद्धो रावणो मन्त्रिपरिषद माहूय तत्पुर स्तद्वधं प्रस्तौति । तत्रैव विभीषणो दूतनीतिं विवृण्वन् तत्प्रश्नमुत्तरयन् ब्रूते —तत्र राजवेशे राक्षसेन्द्रो मन्त्रिवेशे विभीषणोऽन्येऽपि मन्त्रिणः) । (तत्रैव ब्रह्मपाशबद्धो बन्दीवेशे हनूमानपि तिष्ठति) । राक्षसेन्द्रः—

प्रब्रूत मन्त्रिणो यूयं का नीतिरिह साम्प्रतम् ।
प्रब्रूत मन्त्रिणो यूयं का नीतिरिह साम्प्रतम् ॥९८

(तत्र विभीषणो ! निर्विशङ्को घन इव प्रणिनदन् ब्रूते)—

विभीषणः—

प्रणिघ्नन्तं ब्रुवेऽहं त्वां घनः प्रणिनदन्निव ।
तव प्रणिहितः स्वार्थे राक्षसेन्द्र ! निशम्यताम् ॥९९

१—'आनिलोट ८।४।१६ इत्यतः क्रमेण सूत्रोदाहरणानि अस्मिन्नेव संवादे समाप्तानि । हनुमद्रावणसंवादे प्रकीर्ण काण्डम् । पञ्चमसर्गस्य सप्तनवतितमपद्यात् प्रक्रान्तोऽधिकारकाण्डोऽत्रांकशून्यैकमिते १०९ नवमसर्गीय-पद्ये समाप्तो ज्ञेयः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रणिशाम्य दशग्रीव ! प्रणियातुमलं रुषम् ।
प्रणिजानीहि हन्यन्ते दूता दोषे न सत्यपि ॥१००॥

(इति ब्रुवन्तं विभीषणं पुनः क्रोधे एव रावणो ब्रूते)—

रावणः—

प्राणयंस्त्वमिमं कस्मान्नीतिं वक्षि विभीषण !
प्राणिणिषुर्न पापोऽयं योऽभांक्षीत्प्रमदावनम् ॥१०१॥
प्राघानिषत रक्षांसि येनाक्षानि वने मम ।
न प्रहण्मः कथं पापं वद, पूर्वापकारिणम् ॥१०२॥
वेश्मान्तर्हणनं कोपान् मम शत्रोः करिष्यतः ।
मा कार्षीरन्तरयणं प्रयाणार्हमवेह्यमुम् ॥१०३॥
प्रहीणजीवितं कुर्युर्यं न शत्रुमुपस्थितम् ।
न्याय्याया अपि ते लक्ष्म्याः कुर्वन्त्याशु प्रहापणम् ॥१०४॥
कः कृत्वा रावणामर्ष - प्रकोपणमवद्यधीः ।
शक्तो जगति शक्रोऽपि कर्तुमायुःप्रगोपणम् ॥१०५॥
वनान्त-प्रेंखणः पापः फलानां परिणिंसकः ।
प्रणिक्षिप्यति नो भूयः प्रणिन्द्यास्मान् मधून्ययम् ॥१०६॥
हरेः प्रगमनं नास्ति न प्रभानं हिमद्रुहः ।
नापि प्रवेपनं वायोर्मया गोपायिते वने ॥१०७॥
दुष्पानः पुनरेतेन कपिना भृङ्गसंभृतः ।
प्रनष्टविनयेनाग्र्यः स्वादुः पुष्पासवो वने ॥१०८॥

(इति क्रोधावेशे कपिं विगर्ह्य विरते रावणेऽवसरज्ञो विज्ञो हनुमान् स्वार्थसाधनधिया सानुनयं वाक्यमग्रिमे संवादे वक्ति ।)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(हनुमद्रावण-संवादस्त्रयस्त्रिंशः ३३)

नवम-सर्गः

हनूमान्—(राक्षसैर्निगृहीतोऽपि उत्थाय ब्रूते-)

अहो रोषभरास्यस्य क्षुभ्नतो भवतो नु किम् ?
युक्तं राक्षसराजस्य क्षुद्रे मयि क्रुधावचः ॥१०९॥
दूतमेकं कपिं बद्धमानीतं वेश्म पश्यतः ।
लोकत्रयपतेः कोधः कथं तृणलघुस्तव ॥११०॥
अग्न्याहित-जने प्रह्वे विजिगीषा-पराङ्मुखे ।
कस्माद्वा नीति-निष्ठस्य संरम्भस्तव तापसे ॥१११॥
न सर्व-रात्र-कल्याण्यः स्त्रियो वा रत्नभूमयः ।
यं विनिर्जित्य लभ्यन्ते कः कुर्यात्तेन विग्रहम् ॥११२॥

(तदेव दर्शयन् ब्रूते—)

संगच्छ राम-सुग्रीवौ भुवनस्य समृद्धये ।
रत्नपूर्णाविवाम्भोधी हिमवान् पूर्वपश्चिमौ ॥११३॥

तौ चाऽनायासलभ्यौ स्ता, पश्य त्वं परमार्थतः—

सुहृदौ रामसुग्रीवौ किङ्कराः कपियूथपाः ।
परदारार्पणेनैव लभ्यन्ते मुञ्च मैथिलीम् ॥११४॥

पुरुषार्थ-त्रय-प्राप्तिः, सुलभा ते विचारय—

धर्मं प्रत्यर्पयन् सीतामर्थं रामेण मित्रताम् ।
कामं विश्वास-वासेन सीतां दत्त्वाऽप्नुहि त्रयम् ॥११५॥

विरोधेन तु तस्य त्वं, बलं पश्य विवेकतः—

विराध - ताडका - वालि-कबन्ध - खर-दुषणैः ।
न च न ज्ञापितो यादृङ् मारीचेनापि ते रिपुः ॥११६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

खरादि-निधनं चापि मा मंस्था वैर-कारणम् ।
आत्मानं रक्षितुं यस्मात् कृतं तन्न जिगीषया ॥११७॥

(ततोऽतिक्षुब्धः स्फुरदधरोष्ठो रावणो ब्रूते—)

रावणः—

हतराक्षस-योधस्य विरुग्णोदग्र - शाखिनः ।
दूतोऽस्मीति ब्रुवाणस्य किं दूतसदृशं तव ॥११९॥

शृणु कोपकारणं तापसे—

पङ्गु-बाल-स्त्रियो निघ्नन् कबन्ध-खर-ताडकाः ।
तपस्वी यदि काकुत्स्थः कीदृक् कथय पातकी ॥१२०॥

यं विनिर्जित्येत्यस्योत्तरं शृणु—

अभिमानफलं जानन् महत्त्वं कथमुक्तवान्
रत्नादिलाभशून्यत्वान्निष्फलं रामविग्रहम् ॥१२१॥

त्वं किं धर्मं ज्ञास्यसि ?—

पर-स्त्री-भोग-हरणं धर्म एव नराशिनाम् ।
मुखमस्तीत्यभाषिष्ठाः का ! मे साऽऽशङ्कता त्वयि ॥१२२॥

अरे मूढ !

भयं नाम न जानेऽहं त्वं च जानासि मे व्रतम् ।
संगच्छ राम - सुग्रीवाविति तेऽनर्थकं वचः ॥१२३॥
ब्रूहि दूर-विभिन्नाना मृद्धि-शील-क्रियान्वयैः ।
हनुमन् ! कीदृशं सख्यं नर-वानर-रक्षसाम् ॥१२३क

मति-विभ्रम एवाऽस्ति, विराध-विषयेऽपि ते

एको द्वाभ्यां विराधस्तु जिताभ्यामविवक्षितः ।
हतश्छलेन मढोऽयं तेनास्ति तव कः स्मयः ॥१२४॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैव मूर्खो मारीचोऽपि च तेन निपातितः—

मन्नियोगेन मारीचः पलायन-परायणः ।
युयुत्सा - रहितो रामं ममारापहरन् वने ॥१२५॥

अन्यच्च—

निजघानान्य-संसक्तं सत्यं रामो लतामृगम्
त्वमेव ब्रूहि सञ्चिन्त्य युक्तं तन्महतां यदि ॥१२६॥

अयि मूढाऽविवेकिंस्त्वं, मुधा जल्पसि यद् बहु ।
पुंसा भक्ष्येण बन्धूनामात्मानं रक्षितुं वधः ।
क्षमिष्यते दशास्येन कृत्येयं तव दुर्मतिः ॥१२७॥

(इत्येवं स्वसदृशं जल्पति दशास्ये, कपिः सयुक्ति पुनाराजनीतिमुपदिशति)—

हनूमान्—(ओजायितो भवन्)

दशास्य ! शृणु दूतोऽह मुपायं तव दर्शने ।
द्रुम-राक्षस - विध्वंसमकार्षं बुद्धि - पूर्वकम् ॥१२८॥
शृणु स्तो यदि कर्णौ ते स्फुटमेतद्वदामि ते ।
सत्यं मे बधिरान्धस्य पुरस्तेऽनर्थकं वचः ।१२९(क)
आत्रिकूटमकार्षुर्ये त्वत्का निर्जङ्गमं जगत् ।
दशग्रीव ! कथं ब्रूषे तानवध्यान् महीपतेः ॥१२९॥

अपि च—

अभिमान - फलं प्रोक्तं यत्त्वया राम - विग्रहे ।
विनेशुस्तेन शतशः कुलान्यसुररक्षसाम् ॥१३०॥

अन्यच्च—

यत्स्वधर्ममधर्मं त्वं दुर्बलं प्रत्यपद्यथाः ।
रिपौ रामे च निःशङ्को नैतत्क्षेमकरं चिरम् ॥१३१॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वन्तु खोक्तिविरोधं च, न पश्यसि दशानन—

अन्वयादि-विभिन्नानां यथा सख्यमनीप्सितम् ।
नैषीर्विरोधमप्येवं सार्धं पुरुष वानरैः ॥१३२॥

अपि चैवं त्वदुक्त्यैव, रामस्य धन्विता मता—पश्य—

विराधं तपसां विघ्नं जघान विजितो यदि ।
वरो धनुर्भृतां रामः स कथन्न विवक्षितः ॥१३३॥

अन्यच्च—अद्भुतं वाक्छलं तेऽदो, वाग्जाले पतसि स्वयं—

प्रणश्यन्नपि नाशक्नोदत्येतुं बाणगोचरम् ।
त्वयैवोक्तं महामायो मारीचो रामहस्तिनः ॥१३४॥

कथं विस्मरसि स्वीयां, दशां बालिवधेऽधुना—

अन्यासक्तस्य यद्वीर्यं न त्वं स्मरसि बालिनः ।
मूर्छावान् नमतः सन्ध्यां ध्रुवं तद्बाहु-पीडितः ॥१३५॥
न्यक्कृत्य स्वाभिमानं त्वं सुहृदो वचनं शृणु—
पथ्यं कटुकमत्युग्रमौषधं श्रूयते बुधैः ॥१३६॥
असद्बन्धुवधोपज्ञं विमुञ्च बलिविग्रहम् ।
सीतामर्पय नन्तव्ये कोशदण्डात्मभूमिभिः ॥१३७॥

(इत्येवं निर्भीके राजनीति-मर्म विवृण्वति हनूमति तप्ततमसर्पिषि सलिलपातवदुद्दीप्तो रावणस्तस्य पुच्छदाहमादिश्य विरराम । राक्षसा दग्धुं पुच्छं तं बहिर्नयन्ति) [जवनिकापातः]

[पुनः कपिसीता-संवादः चतुस्त्रिंशः ३४]

(दशम-सर्गः)

(पुच्छदाहेन लङ्कादाहं कृत्वा कृतपयोधिप्लवः प्लवङ्गमः सीता-पार्श्वमुपैति । प्रास्थानिकवेशे कपिः, सीता विरहिणीवेशे)

(तरुतलोपविष्टां सीतां सुरक्षितां वीक्ष्य सन्तुष्टो मनसि स्तुवन् पादादिमध्ययमकेन ब्रूते—)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हनूमान्—

घन - गिरीन्द्र - विलङ्घनशालिना
वन - गता वनज - द्युति-लोचना
जन-मता दृष्टशे जनकात्मजा
तरु-मृगेण मया स्थल-शायिनी ॥ १५ ॥

अपिच—(विपथयमकेन)—

कान्ता सहमाना दुःख-च्युत-भूषा ।
रामस्य वियुक्ता कान्ता सह-माना ॥ १६ ॥

(प्रकाशम्) महाराज्ञि ! प्रणमामि । भवदाज्ञया सर्वं स्वाभीष्ट-मुपलब्धम् । सम्प्रति प्रस्थानमेवावशिष्टम् । तदनुजानीहि मां गन्तुम् । (इत्युक्त्वाऽज्ञां प्रतीक्षते)—

सीता—

अहो त्वयाऽद्भुतं कर्म कर्मज्ञ ! दुष्करं कृतम् ।
सम्यङ् निरीक्षितः शत्रुः शत्रुनेत्राऽधुनेयताम् ॥क १६॥

(भूमित उत्थाय नम्रीभूयाज्ञां गृह्णन् मध्यान्त-यमकेन—)

हनूमान्—

दधदमृतमुदारं ते वचोऽहं मुदारं
रघु-वृषभ-सकाशं यामि देवि प्रकाशम् ।
तव विदितविषादो दृष्ट - कृत्स्नामिषादः
श्रियमनिश मवन्तं पर्वतं माल्यवन्तम् ॥ १७ ॥

(पुनः सीतां प्रणम्योड्डयमानो ब्रूतेऽर्धगर्भयमकेन—)

परिडये वियदप्रगमः परै -
रुचित मुन्नति - मत् पृथु - सत्त्व - वत् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुचित - मुन्नति - मत् पृथु - सत्त्व - वत् ।
प्रति - विधाय वपुर्भयदं द्विषाम् ॥ १८ ॥

अपिच—

प्रतिजाने भवतीं शीघ्रमेव (महायमकेन)—

अभियाता वरं तुङ्गं भूभृतं रुचिरं पुरः ।
कर्कशं प्रथितं धाम स-सत्त्वं पुष्करेक्षणम् ॥ २० ॥
अभियाऽताऽवरं तुङ्गं भूभृतं रुचिरं पुरः ।
कर्कशं प्रथितं धाम स-सत्वं पुष्करे क्षणम् ॥ २१ ॥

(इति हनुमानुड्डीनो नभसि प्रस्थितो जवनिकापातः)

[हनुमद्राम-संवादः ३५ पञ्चत्रिंशः]

(दशम-सर्गः)

(लङ्कातः परावृत्तो मारुति र्माल्यवति वसन्तं रामं वक्ति—)

मारुतिः—(प्रणम्य) प्रभो ! मया सर्वं मपारं शत्रुरहस्यं ज्ञातं संक्षेपा च्छ्रूयताम् (समोपमया)—

युष्मानचेतन् क्षय - वायु - कल्पान्
सीता - स्फुलिङ्गं परिगृह्य जाल्मः ।
लङ्का - वनं सिंह - समोऽधिशेते
मतुं द्विषन्नित्यवधेहि राजन् ॥ ३६ ॥

अन्यच्च—(अर्थान्तरन्यासेन)—

अहृत धनेश्वरस्य युधि यः समेत-मायो धनम्
तमहमितो विलोक्य विबुधैः कृतोत्तमाऽयोधनम् ।
विभव-मदेन निहु त-हियाऽतिमात्र-सम्पन्नकं
व्यथयति सत्पथादधिगताऽथवेह सम्पन् न कम् ॥ ३७ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरंच—(आक्षेपेण प्रतिषेधापर-पर्यायेण—)

ऋद्धिमान् राक्षसो मूढश् चित्रं नासौ यदुद्धतः ।
को वा हेतुरनार्य्याणां धर्म्ये वर्त्मनि वर्तितुम् ॥ ३८ ॥

तथैव—(आक्षेपेण प्रतिषेधापराख्येन—)

तस्याधिवासे तनुरुत्सुकाऽसौ
दृष्टा मया राम - पतिः प्रमन्युः ।
कार्य्यस्य सारोऽयमुदीरितो वः
प्रोक्तेन शेषेण किमुद्धतेन ॥ ३९ ॥

अपि च—(कथमपि व्यतिरेकेण—)

समतां शशि - लेखयोपयाया -
दवदाता प्रतनुः क्षयेण सीता ।
यदि नाम कलङ्क इन्दु - लेखा -
मतिवृत्तो लघयेन्न चापि भावी ॥ ४० ॥

एतच्च—श्रोतव्यं श्रूयताम् (विभावनया—)

अपरीक्षित - कारिणा गृहीतां
त्वमनासेवित - वृद्ध - पण्डितेन ।
अविरोधित - निष्ठुरेण साध्वीं
दयितां त्रातुमलं घटस्व राजन् ॥ ४१ ॥

(इत्युक्त्वा विरते हनुमति रामो वक्ति—)

रामः—

अयि मारुते ! भवदुपकारोऽनुतार्यमृणम् । सम्प्रति सीतोद्वेगव्यथित-मनाः शयितुकामोऽहं विधेहि बहिःसैन्यरक्षां शृणु—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हार्दं ते मृदु वचनं निशम्य साधो !
जृम्भावान् भुजयुगलं विभज्य निद्रान् ।
अध्यासे शिशिरिषया प्रवालतल्पं
रक्षायै प्रतिदिशमादिश प्लवङ्गान् ॥ ७५ ॥

(इति सुप्तो रामो मारुतिर्वहिः सैन्यातिदेशे व्यापृतो जवनिकापातश्च)

[मातृ-विभीषण-संवादः षट्त्रिंशः ३६]

(द्वादश-सर्गगः)

(कृत-नित्य-क्रियं मन्त्रि-परिषदमुपेतुकामं विभीषणं मातोपदिशति-रुद्रोपजात्या छन्दसा)

माता—(महाराज्ञीवेशे समुत्थाय)

अये विभीषण !

प्रबाधमानस्य जगन्ति धीमंस्-
त्वं सोदरस्यातिमदोद्धतस्य ।
आनन्दनो नाकसदां प्रशान्ति
तूर्णं विषस्याऽमृतवत् कुरुष्व ॥ २ ॥

कुर्यास्तथा, येन जहाति सीतां
विषाद - नीहार - परीत - मूर्तिम् ।
स्थितां क्षितौ शान्त - शिखा - प्रतानां
तारामिव त्रास - करीं जनस्य ॥ ३ ॥

अपि च—

यावन्न संत्रासित - देव - संघः
पिण्डो विषस्येव हरेण भीष्मः ।
संग्रस्यतेऽसौ पुरुषाधिपेन
द्रुतं कुलानन्द ! यतस्व तावत् ॥ ४ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हता जन - स्थान - सदो निकायाः
कृता जितोत्खात - भट - द्रुमा पूः ।
सर्दासि दग्धानि, विधेयमस्मिन्
यद् बन्धुना, तद् घटयस्व तस्मिन् ॥ ५ ॥

विभीषणः (साञ्जलिबद्धमुत्थाय) तेनैवच्छन्दसा (सूर्योपजात्या-)

मातर्गुरूपासनया विवर्जितं
सोदर्य मुग्रं बुध - मानिनं प्रति ।
क एष ते सूनुरमोघवागपि
तथापि सर्वोपनिषद् यतिष्यते ॥ ६ ॥

(इति वदन् विभीषणो निष्क्रान्तो जवनिकापातः)

[रावणमन्त्रिपरिषत्संवादः सप्तत्रिंशः ३७]

(द्वादश-सर्गः)

(सिंहासनारूढो दक्षिणहस्तं सरत्नांगुलीयकं प्रसार्य रावणो मन्त्रि-परिषदं सम्बोध्य ब्रूते—रुद्रोपजात्या—)

शक्तैः सुहृद्भिः परिदृष्ट - कार्यै-
राम्नातिभिर्नीतिषु बुद्धिमद्भिः ।
युष्मद्विधैः सार्द्धमुपायविद्भिः
सिध्यन्ति कार्याणि सुमन्त्रितानि ॥१४॥

अतश्च—

उपेक्षिते बाल्खिलराऽदिनाशे
दग्धे पुरेऽक्षे निहते सभृत्ये ।
सैन्ये द्विषां सागरमुत्तितीर्षा-
वनन्तरं व्रत यदत्र कृत्यम् ॥ १५ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(इत्यभिधाय जोषमाश्रिते रजनीचरनाथे प्रहस्तप्रमुखा मन्त्रिणः स्व-स्व-भुजांसासिगदादि-संस्पर्शपूर्वं सोत्साहमुद्गिरन्ति)—

अखण्ड्यमानं परिखण्ड्य शक्रं
त्वं पण्डितम्मन्यमुदीर्णदण्डः ।
नराभियोगं नृभुजां प्रधान !
मन्त्रोन्मुखः किं नयसे गुरुत्वम् ॥ १६ ॥

किम्बहुना—

निर्यत्स्फुलिङ्गाऽङ्कुल - धूमराशिं
किं ब्रूहि भूमौ पिनषाम भानुम् ।
आदन्त - निष्पीडित - पीतमिन्दुं
ष्ठीवाम शुष्केक्षु - लताऽस्थिकल्पम् ॥ १८ ॥

अपि राजन् !

स-राघवैस्तैर्वत वानरैः किं
यैः प्रातराशोऽपि न कस्यचिन्नः ।
स - स्थाणु - कैलास - धराभिधत्स्व
किं द्यौरधोऽस्तु क्षितिरन्तरिक्षे ॥ १९ ॥

तद्धि न किञ्चित्—

चापल्य - युक्तस्य हरेः कृशानुः
समेधितो बालधिमाक् त्वदीयैः ।
शस्त्रेण वध्यस्य गलन्नधाक्षीद्-
राजन् ! प्रमादेन निजेन लङ्काम् ॥ २० ॥

(इत्येवं चाटूक्तिपरायां मन्त्रिपरिषदि सुनीतिं विभीषणः शान्त-गम्भीरमभिधत्ते)—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभीषणः—(उत्थाय मन्त्रिणः सम्बोध्य-तेनैवच्छन्दसा)—

युद्धाय राज्ञा सुभृतैर्भवद्भिः
सम्भावनायाः सदृशं यदुक्तम् ।
तत् प्राणपण्यैर्वचनीयमेव
प्रज्ञा तु मन्त्रेऽधिकृता न शौर्यम् ॥ २२ ॥

नराभियोगे गुरुत्वं शृणुत—

यच्चापि यत्नाऽदृत - मन्त्र - वृत्ति-
र्गरुत्वमायाति नराभियोगः ।
वशीकृतेन्द्रस्य कृतोत्तरोऽस्मिन्
विध्वंसिताऽशेषपुरो हनूमान् ॥ २३ ॥

प्रमादाल्लङ्कादाहोऽस्माकमिति यदुक्तम् तत्र शृणुत—

अग्निः प्रमादेन ददाह लङ्कां
वध्यस्य देहे स्वयमेधितश्चेत् ।
विमृश्य तद्वेधियाऽभिधत्त
ब्रह्मास्त्रबन्धोऽपि यदि प्रमादः ॥ २४ ॥

जगन्त्यमेयाऽद्भुत - भाव - भाञ्जि
जिताऽभिमानाश्च जना विचित्राः ।
कार्यं तु यत्नं कुरुत प्रकृष्टं
मा नीति-गर्भान् सुधियोऽवमन्ध्वम् ॥ २५ ॥

शृणुत राजनीतिम्—

वृद्धि - क्षय - स्थान - गतामजस्रं
वृत्तिं जिगीषुः प्रसमीक्षमाणः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटेत सन्ध्यादिषु यो गुणेषु
लक्ष्मीर्न तं नुञ्चति चञ्चलाऽपि ॥ २६ ॥

निष्कर्षमेव वच्मि भवन्तं राजानम्—

एकेन सन्धिः कलहोऽपरेण
कार्योऽभितो वा प्रसमीक्ष्य वृद्धिम् ।
एवं प्रयुञ्जीत जिगीषुरेता
नीतीर्विजानन्नहितात्म - सारम् ॥ ३५ ॥

त्वया तु एतद्विपरीतमेवाऽनुष्ठितमिति शृणु तथाहि—

त्वया तु लोके जनितो विरागः
प्रकोपितं मण्डलमिन्द्रमुख्यम् ।
रामे तु राजन् विपरीतमेतत्
पश्यामि तेनाऽभ्यधिकं विपक्षम् ॥ ३६ ॥

पूर्वत एव भवत्कार्यविनाशं पश्यामि—

एकेन वाली निहतः शरेण
सुहृत्तमस्ते रचितश्च राजा ।
यदैव सुग्रीव - कपिः परेण
तदैव कार्यं भवतो विनष्टम् ॥ ३७ ॥

अन्यच्चैकेन वालिवधेन बहुसाधितं शत्रुणा—

त्वन्मित्रनाशो निजमित्र - लाभः
समेत-सैन्यः स च मित्र - कृच्छ्रे ।
भोग्यो वशः पश्य शरेण शत्रोः
प्रसाधितो वालिवधे न कोऽर्थः ॥ ४७ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च सर्वथा अविग्रहार्हः शत्रुः—

शस्त्रं तरूर्वीधरमम्बुपानं
वृत्तिः फलैर्नो गजवाजिनार्थः ।
पश्चान्न राष्ट्रं न जनोऽभिरक्ष्यः
दुःस्थं किमाचक्ष्व भवेत् परेषाम् ॥ ५३ ॥

अतश्च सर्वथा सन्धेयोऽरिरस्माकम्—

सन्धानमेवास्तु परेण तस्मात्-
नान्योऽभ्युपायोऽस्ति निरूप्यमाणः ।
नूनं विसन्धौ त्वयि सर्वमेतन्-
नेष्यन्ति नाशं कपयोऽचिरेण ॥ ५४ ॥

(इति संक्षिप्य विरते विभीषणे मातामहो माल्यवान् स्खलद्वाक्-कम्प्रमूर्द्धा ब्रूते) माल्यवान्—अरे वीरा अवधारयत—

एकः पदातिः पुरुषो धनुष्मान्
योऽनेकमायानि वियद्गतानि ।
रक्षः - सहस्राणि चतुर्दशादीत्
का तत्र वो मानुषमात्र - शङ्का ॥ ५६ ॥

ब्रह्मर्षिभिर्नूनमयं स - देवैः
सन्तापितौ रात्रिचरक्षयाय ।
नराकृतिर्वानर - सैन्य - शाली
जगत्यजय्यो विहितोऽभ्युपायः ॥ ५७ ॥

किं बहुना स्तोकेनोपादिशामि-शृणु हितम्

प्रमादवांस्त्वं क्षतधर्मवर्त्मा
गतो मुनीनामपि शत्रुभावम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलस्य शान्तिं बहु मन्यसे चेत्
कुरुष्व राजेन्द्र ! विभिषणोक्तम् ॥ ६० ॥

(माल्यवति विविक्ते सुप्तोत्थितः शृण्वन् कुम्भकर्णोऽपि शयनासनादेत्य स्वशब्देन विभीषणोक्तं समर्थयति—)

कुम्भकर्णः (उत्थाय) अये भ्रातस्त्वं मानं विहाय सन्धिं नहि करिष्यसीति जानन् ब्रुवे—

क्रूराः क्रिया ग्राम्यसुखेषु सङ्गः
पुण्यस्य यः संक्षयहेतुरुक्तः ।
निषेवितोऽसौ भवताऽतिमात्रम्
फलत्यवल्गु ध्रुवमेव राजन् ॥ ६१ ॥

किं बहुना—

दत्तं न किं के विषया न भुक्ताः
स्थितोऽस्मि वाकं परिभूय नोच्चैः ।
इत्थं कृतार्थस्य मम ध्रुवं स्यान्-
मृत्युस्त्वदर्थे यदि किन्न लब्धम् ॥ ६७ ॥

किं दुर्नयैस्त्वय्युदितैर्मृषार्थैः-
वीर्येण वक्तास्मि रणे समाधिम् ।
न त्वं विधातासि विभीषणोक्तं
जानन् ब्रुवे त्वां पिशिताशनेश ॥ ६८ ॥

इत्यभिधाय शयनासनगते कुम्भकर्णे पुनर्विभीषणो दुःशकुनं निमित्तीकृत्य ब्रूते चारूपदेशम्—

पयो घटोध्नीरपि गां दुहन्ति
मन्दं विवर्णं विरसं च गोपाः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हव्येषु कीटोपजनः सकेशो
न दीप्यतेऽग्निः सुसमिन्धनोऽपि ॥ ७३ ।
तस्मात् कुरु त्वं प्रतिकारमस्मिन्
स्नेहान्मया रावण ! भाष्यमाणः ।
वदन्ति दुःखं ह्यनुजीवि - वृत्ते
स्थिताः पदस्थस्य परिणामपथ्यम् ॥ ७४ ॥

(इत्येवं ब्रुवति विभीषणे कोपकषायिताक्षो रूक्षवाग्रावणः स्वं स्फावयन् ब्रूते—)

रावणः—(उत्थाय गर्जन्—) विभीषणमभिलक्ष्य—

शिला तरिष्यत्युदके न पर्णं
ध्वान्तं रवेः स्यन्दयति वह्निरिन्दोः ।
जेता परोऽहं युधि जेष्यमाण-
स्तुल्यानि मन्यस्व पुलस्त्य - नप्तः ! ॥ ७७ ॥

अरे कृतघ्न—

अनिर्वृतं भूतिषु गूढ - वैरं
सत्कार-कालेऽपि कृताऽभ्यसूयम् ।
विभिन्न-कर्माशय-वाक् कुले नो
मा ज्ञातिचेलं भुवि कस्यचिद् भूः ॥ ७८ ॥

अत्र प्रत्यक्षं कुलाधम !

त्वयाऽद्य लङ्काऽभिभवेऽतिहर्षाद्
दुष्टोऽति - मात्राद्विवृतोऽन्तरात्मा ।
धिक् त्वां मृषा ते मयि दुष्ट - बुद्धिः
स्वयोग्यमेतत् प्रगृहाण पार्ष्णिम् ॥ ८० ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(इति रावणः पाद-प्रहारं दत्त्वा मन्त्रिसभातो तं निर्गमयति क्रुद्धः । विभीषणस्तु स्थिर-बुद्धिः क्षभया क्रोधं निगृह्णन् मन्त्रिमुख्यैश्चतुर्भिः सह सभातो निर्गच्छन् वक्ति—)

विभीषणः—

मुख्यैश्चतुर्भिः सचिवैर्व्रजेयं-
सुखं महाराज ! विना मयाऽस्त्व ।
मूर्खाऽतुरः पथ्य-कटूननश्नन्
यत् सामयोऽसौ भिषजां न दोषः ॥८२॥

दत्तः स्वदोषै र्भवता प्रहारः
पादेन धर्म्ये पथि मे स्थितस्य ।
स चिन्तनीयः सह मन्त्रि-मुख्यैः
कस्यावयोर्लाघवमादधाति १

(इति वदन् विनिर्गतो विभीषणो जवनिका-पातः)

[रावण-कुम्भकर्ण-संवादोऽष्टात्रिंशः ३८]

(लुङ् विलसित-पञ्चदश-सर्गः)

(महता प्रयत्नेनोत्थापितं पार्श्वमुपेतं कुम्भकर्णं रावणो वक्ति तमुत्साहयन्)—

रावणः—(विषीदन्)

अयि भ्रातः प्रसुप्तस्त्वं षण् - मासानागतोऽधुना ।
मा ज्ञासीस्त्वं सुखी रामो यदकार्षीत् स रक्षसाम् ॥ ९ ॥
उदतारीदुदन्वन्तं पुरं नः परितोऽरुधत् ।
व्यद्योतिष्ट रणे शस्त्रै रनैषीद्राक्षसान् क्षयम् ॥ १० ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं बहुना—

न प्रावोचमहं किञ्चित् प्रियं यावदजीविषम् ।
बन्धुस्त्वमर्चितः स्नेहान् मा द्विषो न वधीर्मम ॥ ११ ॥
वीर्यं मा न ददर्शस्त्वं मा न त्रास्थाः क्षतां पुरम् ।
तवाद्राक्ष्म वयं वीर्यं त्वमजैषीः पुरा सुरान् ॥ १२ ॥

(ततः स्पष्टवक्ता कुम्भकर्णस्तमुपालभतेऽभिमुखम्) .

कुम्भः—

स्मर राजन् ! पुरा सर्वे वयं मन्त्रेऽभ्यधाम यत् ।
न त्वं सर्वं तदश्रौषीः फलं तस्येदमागमत् ॥ १३ ॥
प्राज्ञवाक्यान्यवामंस्था मूर्खवाक्येष्ववास्थिथाः ।
अध्यगीष्ठाश्च शास्त्राणि प्रत्यपत्था हितं न च ॥ १४ ॥
मूर्खास्त्वामवबध्नन्त ये विग्रहमकारयन् ।
अभाणीन्माल्यवान् युक्तमक्षंस्थास्त्वं न तन्मदात् ॥ १५ ॥
राघवस्यामुषः कान्तामाप्तैरुक्तो न चार्पिपः ।
मा नानुभूः स्वकान् दोषान् मा मुहो मा रुषोऽधुना ॥ १६ ॥
तस्याप्यत्यक्रमीत् कालो यत्तदाऽहमवादिषम् ।
अघानिषत रक्षांसि परैः कोशांस्त्वमव्ययीः ॥ १७ ॥
सन्धानकारणं तेजो न्यगभूत्ते कुथास्तथा ।
यत्त्वं वैराणि कोशं च सहदण्डमजिग्लपः ॥ १८ ॥

रावणः—(क्रोधपरवशो भर्त्सयन् स कुम्भकर्णं पुनर्ब्रूते)—

नोपालम्भस्य कालोऽयमवादीरविचारयन् ।
किं त्वं मामजुगुप्सिष्ठा नैदिधः स्वपराक्रमम् ॥ १९ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपिच—

मोज्जिग्रहः सुनीतानि मा स्म क्रंस्था न संयुगे ।
मोपालब्धाः कृतैर्दोषैर्मा न वाक्षी र्हितं परम् ॥ २० ॥

कुम्भः—(ओजायितो ब्रूते—)

अयेऽहं यामि संग्रामे मा न प्रैषीर्भटान् बहून् ।
मा न द्राक्षी र्महावीर्यं रणेऽरीन्मम हिंसतः ॥ २१ ॥

(इति निर्गतः कुम्भ-कर्णो जवनिकापातः)

[रावणि-विभीषण-संवाद ऊनचत्वारिंशः ३९]

(लङ्विलसित—सप्तदश-सर्गगः)

(निकुम्भिलास्थितो रावणि विभीषणं विगर्हते)—

इन्द्रजित्—

पितृव्य ! किमसमर्याद ! मामिहाह्वयथाः परैः ।
त्वमत्राऽजायथा देह इहापुष्यत् सुराऽभिषैः ॥ ३२ ॥
इहाऽजीव इहैव त्वं क्रूरमारभथाः कथम् ।
नाऽपश्यः पाणिमार्द्रं त्वं बन्धुत्वं नाप्यपेक्षथाः ॥ ३३ ॥

अपिच—

अधर्माद्नाऽत्रसः पाप ! लोकवादान्न चाऽबिभेः ।
धर्म-दूषण ! नूनं त्वं नाऽजाना नाऽशृणोरिदम् ॥ ३४ ॥
ब्रह्मापि विष्णु - देवोऽपि योऽपि कोऽपि भवेन्नु ।
निराकृत्य यथा बन्धूँल्लघुत्वं यात्यसंशयम् ॥ ३५ ॥

(ततो विभीषणोऽपि यथार्थाभिधानेन तं विनिन्दति)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभीषणः—

मिथ्या मा स्म व्यतिक्रामो मच्छीलं मा न बुध्यथाः ।
सत्यं समभवं वंशे पापानां रक्षसामहम् ॥ ३६ ॥
न त्वजायत मे शीलं तादृग् यादृक् पितु स्तव ।
क्षयावहेषु दोषेषु वार्यमाणो मयाऽरमत् ॥ ३७ ॥
दशग्रीवोऽहमेतस्मादत्यजं तं न विद्विषन् ।
पर-स्वान्यार्जयन्नारीरन्यदीयाः पराभृशत् ॥ ३८ ॥
व्यजिघृक्षत् सुरान्नित्यं प्रामाद्यद्गुणिनां हिते ।
आशङ्कत सुहृद्बन्धूनवृद्धान् बह्वमन्यत ॥ ३९ ॥
दोषैरमीभिस्ते पिताऽत्यज्यत यैर्मया ।
अजानंस्त्वं कथं पाप ! गर्हसे मामनागसम् ॥ ४० ॥

(इत्युक्तवति विभीषणे पुष्पवृष्टिर्जवनिकापातश्च)

[राम-विभिषण-संवादश्चत्वारिंशः ४०]

(लङ्विलसिताष्टादशोनविंश-सर्गः)

(तत्र मृतं दशास्यं शोचन्तं विभीषणं राम उपदिशति)—

रामः—

अये पौलस्त्य ? शोच्यो नो दशास्योऽद्य हि ते शृणु—

दातुः स्थातुर्द्विषां मूर्ध्नि यष्टुस्तर्पयितुः पितॄन् ।
युध्यभग्नाऽविपन्नस्य किं दशास्यस्य शोचसि ? ॥ ४० ॥
वोभवीति न सम्मोहो व्यसने स्म भवादृशाम् ।
किं न पश्यसि सर्वोऽयं जनस्त्वा मवलम्बते ॥ ४१ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपजात्या—

त्वमर्हसि भ्रातुरनन्तराणि, कर्तुं जनस्यास्य च शोक-भङ्गम् ।
धुर्यें विपन्ने त्वयि राज्य-भारो मज्जत्यनूढः क्षणदाचरेन्द्र ! ॥

(इति वदन्नष्टादशसर्गान्ते विरतो रामस्तत ऊनविंशे ब्रूते)

विभीषणः—

अयि सर्वज्ञ भगवन् ! सर्ववीराग्रणीर्महान्
विद्वान् सञ्जीविनीज्ञश्च रावणो लोकरावणः ।
अशोच्योऽपि व्रजन्नस्तं सनाभिर्दुनुयान्न किम् ॥१॥

किं वाच्यं तस्य, तथापि—

तं नो देवा विधेयासु र्येन रावणवद्वयम् ।
सपत्नांश्चाधिजीयास्म संग्रामे च मृषीमहि ॥ २ ॥
क्रियेरंश्च दशास्येन यथाऽन्येनापि नः कुले ।
देवद्रुयश्चो नराहारा न्यक्षश्च द्विषतां गणाः ॥ ३ ॥
स एव धारयेत् प्राणानीदृशे बन्धु-विप्लवे ।
भवेदाश्वासको यस्य सुहृच्छक्तो भवादृशः ॥ ४ ॥

किञ्च

म्रियेयोर्ध्वं मुहूर्ताद्धि न स्यास्त्वं यदि मे गतिः ।
आशंसा च हि नः प्रेते जीवेम दशमूर्धनि ॥ ५ ॥
प्रकुर्याम वयं देशे गर्हां तत्र कथं रतिम् ।
यत्र विंशतिहस्तस्य न सोदर्यस्य सम्भवः ॥ ६ ॥

(इत्येवं विलप्य रामाज्ञया दशास्य-शवनिर्हरणे व्यापृतोऽभूत्)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(अन्त्येष्टि-संस्कारान्ते राज्ये शोकोद्धोवस्ततो रामदर्शनम्)—

[पुनाराम-विभीषण-संवाद एकचत्वारिंशः ४१]

(लिङ् विलसितोनविंश-सर्गः)

कृतभ्रातृ-श्राद्धकृत्यो विभीषणो रामं द्रष्टुमुपेतो ब्रूते साञ्जलिः—

विभीषणः—

भगवन् भवदादेशाद् भ्रातृ - श्राद्धं कृतं मया ।
शिष्या मां किङ्करं प्राप्तं येन श्रेयोऽहमाप्नुयाम् ॥ २२ ॥

(ततो रामो लङ्काराज्येऽभिषिक्तं तं वक्ति—)

रामः—(तर्जन्या निर्दिशन्)—

पूर्वमेव मया सिक्तो लङ्का - राज्ये विवेकवान्
त्वं राजा रक्षसां लङ्कामवेक्षेथा विभीषण ! ॥ २३ ॥
क्रुद्धाननुनयेः सम्यक् धनैर्लुब्धानुपार्जयेः ।
मानिनो मानयेः काले त्रस्तान् पौलस्त्य ! सान्त्वयेः ॥ २४ ॥
इच्छा मे परमा नन्देः कथं त्वं वृत्तशत्रुवत् ।
इच्छेद्धि सुहृदं सर्वो वृद्धिसंस्थं यतः सुहृत् ॥ २५ ॥
धेयास्त्वं सुहृदां प्रीतिं बन्दिषीष्ठा दिवौकसः ।
सोमं पेयाश्च हेयाश्च हिंस्रा हानिकरीः क्रियाः ॥ २७ ॥

मन्दाक्रान्तया—

सन्युं वध्या भट-वध-कृतं बालवृद्धस्य राजन् !
शास्त्राऽभिज्ञाः सदसि सुधियः सन्निधिं ते क्रियासुः ।
संरंसिष्ठाः सुर-मुनि - गते वर्त्मनि प्राज्य-धर्मे
संमुत्सोष्ठाः सुनयनयनै र्विद्विषामीहितानि ॥३०॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(इति विरतं रामं विभीषणः प्रणमति पुष्पवृष्टिरुभयोरुपरि जवनिका-पातेन सर्ग-समाप्तिः

[हनुमत्सीता-संवादो द्वाचत्वारिंशः ४२]

(लोड्विलसित-विंश-सर्गः)

(विजयावकाशे भ्रमन् हनुमान् स्वयं सीतामुपेत्य ब्रूते—)

हनुमान्—

विजयोत्सवमातन्वन्नहं देवि ! समागतः ।
दिष्ट्या वर्द्धस्व वैदेहि ! हतस्त्रैलोक्य-कण्टकः ॥ १ ॥
अनुजानीहि हन्यन्तां मयैताः क्षुद्र-मानसाः ।
रक्षिकास्तव राक्षस्यो गृहाणैतासु मत्सरम् ॥ २ ॥

अपि च—

तृणहानि दुराचार - घोर - रूपाश्रय - क्रियाः ।
हिंसा भवतु ते बुद्धिरेतासु कुरु निष्ठुरम् ॥ ३ ॥
पश्चिमं करवामैतत् प्रियं देवि ! वयं तव ।
स्वतन्त्र - विजये योगमाप्नवामेदृशं कुतः ॥ ४ ॥

(ततः, सीता करुणाऽक्रान्ता मारुतिं विलञ्जयति)

सीता—अये हनुमन् !

उपशाम्यतु ते बुद्धिः पिण्ड-निर्देश - कारिषु ।
लघु - सत्त्वेषु दोषोऽयं यत्कृतो निहतोऽसकौ ॥ ५ ॥

अन्यच्च—

न हि प्रेष्य - वधं घोरं करवाण्यस्तु ते मतिः ।
एधि कार्य - करस्त्वं मे गत्वा प्रवद राघवम् ॥ ६ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(एवमुक्तो मारुतिस्त्वरितं गत्वा रामम् वक्ति। रामस्तु अवाङ्मुखो द्दमां विलिख्य विनिःश्वस्य सीतामानेतुं लङ्केशमादिशति। जवनिकापातः।)

[लङ्केश-सीता-संवादस्त्रयश्चत्वारिंशः ४३]

(लोड्विलसित-विंशसर्गः)

(विभीषणो रामाज्ञया सीतामेत्य ब्रूते-बद्धाञ्जलिः)

विभीषणः—

जहीहि शोकं वैदेहि! प्रीतये धेहि मानसम्।
रावणे जहिहि द्वेषं जहाहि प्रमदावनम्॥ १०॥

स्नाह्यनुलिम्प धूपाय निवस्स्वाऽविध्य च स्रजम्।
रत्नान्यामुञ्च संदीप्ते हविर्जुहुधि पावके॥ ११॥

अद्धि त्वं पञ्चगव्यं[1] च छिन्धि संरोधजं तमः।
आरोह शिविकां हैमीं द्विषां जहि मनोरथान्॥ १२॥

यतश्च—

तृणेहु त्वद्वियोगोत्थां राजन्यानां पतिः शुचम्।
भवतादधियुक्ता त्वमत् ऊर्ध्वं स्ववेश्मनि॥ १३॥

ततश्च—

दीक्षस्व सह रामेण त्वरितं तुरगाध्वरे।
दृश्यस्व पत्या प्रीतेन प्रीत्या प्रेक्षस्व राघवम्॥ १४॥

---

१. यस् त्वगस्थिगतो रोगो देहे तिष्ठति मामके
प्राशनात् पञ्चगव्यस्य दहत्यग्निरिवेन्धनम्।
ईदृग्घि महिमा गोवत्सतरी-नूत्रस्य यावज्जीवं नीरोग स्तत्पातेत्यलम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं नियोगः पत्युस्ते नात्र कार्या विचारणा ।
भूषयाङ्गं प्रमाणं चेद् रामं मन्तुं यतस्व च ॥ १५ ॥

अपि च—

मुदा संयुहि काकुत्स्थं स्वयं चामुहि सम्मदम् ।
उपेह्यूर्ध्वं मुहूर्तात्त्वं देवि राघव - सन्निधिम् ॥ १६ ॥

अन्यच्च—

ऊर्ध्वं मुहूर्तादत्रोऽङ्ग ! स्वामिनी स्म भव क्षितेः ।
राजपत्नी - नियोगस्थ मनुशाधि पुरो - जनम् ॥ १७ ॥

एवं च—

उत्तिष्ठस्व मते पत्यु र्यतस्वालङ्कृतौ तथा ।
प्रतिष्ठस्व च तं द्रष्टुं द्रष्टव्यं त्वं महिपतिम् ॥ १८ ॥

(एवमुक्ता सीता द्रुतं सन्नद्धा विभीषणं ब्रूते—)

सीता—(उपजात्या—)

अये लंकेश !

आश्चर्य - कारि - प्रबल - प्रयत्नाद्
वनाद्धृता वारिधि - पार - नीता ।
हर्तारमुन्मूल्य समुद्धृताऽहं
दृष्टान्त एषोऽस्तु समुद्यमस्य ॥१९॥

शिविकां तेऽवरोहाणि द्रुतं पत्युरुपानय ।
अन्तिकं तत्प्रशंसार्थं विवेकि त्वरते मनः ॥

(पुष्पवृष्टिर्जवनिका पातश्च समाप्तः षष्ठः सर्गः)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

[राम-सीता-संवादश्चतुश्चत्वारिंशः ४४]

(अथ सप्तमः सर्गः लोड्विलसित-विंश-सर्गगः)

(संसदि समुपविष्टां सीतां रामोऽधोमुखो ब्रूते—)

रामः ।—

प्राप्त-चारित्र्य - सन्देहो ब्रुवै लोकादनिन्दिते ।
इच्छा मे नाऽद्दै सीते त्वा महं गम्यतामितः ॥ २१ ॥

अशान भरताद्भोगं लक्ष्मणं प्रवृणीष्व वा ।
कामाद्वा याहि मुच्यन्तामाशा राम-निबन्धनाः ॥ २२ ॥

क्व च ख्यातो रघोर्वंशः क्व त्वं परगृहोषिता ।
अन्यस्मै हृदयं देहि नाऽनभीष्टे घटामहे ॥ २३ ॥

यथेष्टं चर वैदेहि पन्थानः सन्तु ते शिवाः ।
कामास्तेऽन्यत्र तायन्तां विशङ्कां त्यज मद्गताम् ॥ २४ ॥

(इत्थमसम्भाव्यां राम - वाचं श्रुत्वाऽपि दृढमुपहसन्ती रामं सीता सम्बोधयति—)

महावीर ! महोद्योगिन् कथमेवं विशङ्कसे ।
स्त्रीसामान्येन सम्भूता शङ्का मयि विमुच्यताम् ॥ २६ ॥

दैवाद् बिभीहि काकुत्स्थ ! जिह्रीहि त्वं तथा जनात् ।
मिथ्या मामेभिसंक्रुध्यन्नवशां शत्रुणा हृताम् ॥ २७ ॥

चेतसस्त्वयि वृत्तिर्मे शरीरं रक्षसा हृतम् ।
विदांकुर्वन्तु सम्यञ्चो देवाः सत्य मिदं वचः ॥ २८ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वं पुनीहि पुनीहीति पुनन् वायो ! जगत्-त्रयम् ।
चरन् देहेषु भूतानां विद्धि मे बुद्धि-विप्लवम् ॥ २९ ॥

चितां कुरु च सौमित्रे ! व्यसनस्यास्य भेषजम् ।
रामस्तुष्यतु मे वाऽद्य पापां पुष्णातु वाऽनलः ॥ ३० ॥

(इति अन्तर्जवनिकं विरचितां चितां प्रवेष्टुकामा सीता [1]प्रहर्षिणीछन्दसा प्लुतान्तं तत्र गत्वोच्चै र्ब्रूते—)

मां दुष्टां ज्वलितवपुः पुनाण वह्ने !
संरक्ष क्षतमलिनां सुहृद् यथा वा ।
एषाहं क्रतुषु वसोर्यथाऽज्ज्यधारा
त्वां प्राप्ता विधिवदुदीर्णदीप्तिमालम् ॥३७॥

(ततः पुष्पवृष्ट्या सह जवनिका पातो दृश्य-समाप्तिश्च)

[अग्न्यादि-देव-राम-संवादः पञ्च-चत्वारिंशः ४५]

(लङ्विलसितैकविंश-सर्गगः)

(तत्राग्निदेवो रक्त-पटो रक्तकूर्चकेशो गृहीत-रक्ताम्बर-सीतो राम-मुच्चैर्वक्ति—हस्तप्रसारम्—)

अग्निदेव :—

अवतीर्ण ! मनोर्वंशे मर्यादा पुरुषोत्तम !
काकुत्स्थ ! दयितां साध्वीं त्वमाशङ्किष्यथाः कथम् ॥ १ ॥

---

१. म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् इति लक्षणम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्रुवमेतत्—

नाभविष्यदियं शुद्धा यद्यपास्यमहं ततः ।
न चैनां, पक्षपातो मे धर्मादन्यत्र राघव ॥ २ ॥

अपि च—

त्वयाऽद्रक्ष्यत किं नास्याः शीलं संवसता चिरम् ।
अदर्शिष्यन्त वा चेष्टाः कालेन बहुना न किम् ॥ ५ ॥

अयि भोः—

समपत्स्यत राजेन्द्र ! स्त्रैणं पद्यत्र चापलम् ।
लोकपाला इहाऽयास्यंस् ततो नाऽभी कलिद्रुहः ॥ ७ ॥

अभंस्यत भवान् यद्वत् तथैव च पिता तव ।
नाऽगमिष्यद् विमानस्थः साक्षाद् दशरथो नृपः ॥ १० ॥

नाऽकल्प्स्यत सन्निधिं स्थाणुः शूली वृषभ-वाहनः ।
अन्वभाविष्यताऽन्येन मैथिली चेत् प्रतिव्रता ॥ ११ ॥

अपरंच—

आनन्दयिष्यदागम्य कथं त्वामरविन्दसद् ।
राजेन्द्र ! विश्वसूर्धाता चारित्र्ये सीतया क्षते ॥ १२ ॥

(ततोऽग्निना प्रोक्ताः सर्वेऽपि ब्रह्मादयो लोकपाला यथा-क्रम मुपेत्य राममनुशासति सीता-सतीत्व-प्रकाशे । तत्र पथमं 'प्रणमन्तं रामं ब्रह्मा ब्रूते—) ब्रह्मा—(उत्थाय प्रणतं रामं च संबोध्य—)

मर्यादा-पालकः श्रीमन् ! व्यस्मरिष्यत् कथं भवान् ।
नाऽशोत्स्यन्मैथिली लोके नाऽचरिष्यदिदं यदि ॥ १३ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाऽमोक्ष्याम वयं शङ्कामिहाधास्यन्न चेद्भवान् ।
किं वा चित्रमिदं युक्तं भवान् यदकरिष्यत ॥ १४ ॥

प्रावर्तिष्यन्त चेष्टा श्चे - द यथा - तथ्यवत् तव ।
अनुशास्ये त्वया लोके रामाऽवत्स्यंस्तरा ततः ॥ १५ ॥

(अत्र शङ्करो भगवान् राममनुशास्ति रामस्तं बद्धाञ्जलिः प्रणमति)

शिवः :—

भगवन् ! परमेशान ! मर्यादा - पुरुषोत्तम !
किं नारायणमात्मानं नाऽमोत्स्यत भवानजम् ॥ १६ ॥

कोऽन्योऽकृत्स्यंदिह प्राणान् दृप्तानां च सुरद्विषाम् ।
को वा विश्वजनीनेषु कर्मसु प्राघटिष्यत ॥ १७ ॥

दैत्य-क्षये महाराज ! यच्च यत्राऽघटिष्यथाः ।
समाप्तिं जातु तत्रापि किं नाऽनेष्यस्त्वमीहितम् ॥ १८ ॥

(ततो रामः स्वाभिनन्दकं ब्रह्माणं शङ्करं च सीता-सतीत्व-संरक्षण-संतुष्टं दशरथं तातं सैन्यक्षेत्रे कृताऽमृतवर्षं शक्रं चोपस्थितान् सर्वान् प्रणमन् ब्रूते—)

रामः—(वामपार्श्वग-सीता-समेतो बद्धाञ्जलिः)—

(सूर्योपजात्या—)

भवत्प्रसादा न्मम सर्वसिद्धयः सीतोपलब्धी रिपुवंशविच्छिदा ।
मित्रोपलब्धिर्भुवि कीर्तिरुत्तमाऽभिमुख्यता सर्वजनेषु वर्द्धिता ॥ १९

सीता—(तथैव ब्रूते—)

(इन्द्रवंशया—)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शक्ति - प्रभावाज् जगदुन्नतिर्भवे
च्छक्तिप्रभावादिह सिद्धयः समाः ।

शक्तिप्रकोपाद् दश-वक्त्र-विच्युतिः
शक्तिः समर्च्या स्वशुभार्थिभिः सदा ॥ २० ॥

(इत्युभौ प्रणमतः सर्वतः पुष्पवृष्टिः सर्गसमाप्त्या दृश्यसमाप्तिश्च । जवनिकापातः सर्वे विनिर्गताः)

[राम-हनुमत्संवादः षट्चत्वारिंशः ४६]

(लुड्-विलसित-द्वाविंश-सर्गगः)

(कृतनित्यक्रियः स्मृत-भरत-प्रतिज्ञो रामो हनुमन्तमादिशति—)

राम :—

श्वःश्रेयसमवाप्तासि विजये कपि - पुङ्गवः ।
अयोध्यां श्वः प्रयातासि मम भरत - पालिताम् ॥ १ ॥

गाधितासे नभो भूयः स्फुटन्मेघघटावलि ।
ईक्षितासेऽम्भसां पत्युः पयः शिशिर-शीकरम् ॥ २ ॥

द्रष्टासि प्रीतिमानारात् सखिभिः सह सेविताम् ।
सपक्षपातं किष्किन्धां पूर्वक्रीडां स्मरन् मुहुः ॥ ६ ॥

अतिक्रान्ता त्वया रम्यं दुःखमत्रेस्तपोवनम् ।
पवित्र-चित्रकूटेऽद्रौ त्वं स्थातासि कुतूहलात् ॥ ९ ॥

ततः परं भरद्वाजो भवता दर्शिता मुनिः ।
द्रष्टारश्च जनाः पुण्य - त्रिवेण्यम्बु - क्षतांहसः ॥ १० ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दितार स्त्वां दृष्ट्वा प्रष्टारश्चावयोः शिवम् ।
मातरः सह मैथिल्या तोष्टा च भरतः परम् ॥ १४ ॥

गते त्वयि पथाऽनेन वयमप्यंहितास्महे ।
लब्धाहेऽहं धृतिं प्राप्ते भूयो भवति सम्मुखे ॥ १७ ॥

(इत्यभिदधति भगवति रामे मारुतिः ओ३म् इत्युक्त्वा प्रतिष्ठते)

मारुतिः—(बद्धाञ्जलिः)

(उपजात्या—)

सौमित्रिनुन्नोऽपि सुवर्ण - लंका-
वीक्षां जहत्तां भरतप्रतिज्ञाम् ।
स्मरन् भवान् मां दिशतीति जानन्
द्रुतं प्रतिष्ठे भवदुक्त - मार्गात् ॥

(इति प्रस्थितो मारुतिरयोध्यां जवनिकापातः)

[राम-कपीश-लङ्केश-संवादः सप्तचत्वारिंशः ४७]

(लुड्विलसित-द्वाविंश-सर्गः)

(हनुमन्तं सम्प्रेष्य कपीश - लङ्केशावप्युपदिशन् रामो वक्ति—)

राम :—

समुत्सुकाविति ज्ञात्वा भवन्ता वुपसान्त्वये ।
अवश्यं श्वोऽभिगन्तास्थो युवां सह मया पुरीम् ॥ १८ ॥

द्रष्टास्थस्तत्र तिस्रो मे मातृस्तुष्टान्तरात्मनः ।
आत्यन्तीनं सखित्वं च प्राप्तास्थो भरताऽश्रयम् ॥ १९ ॥

नैवं विरह-दुःखेन वयं व्याधानितास्महे ।
श्रमोऽनुभविता नैवं भवद्भ्यां विरहाधिजः ॥ २० ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं युवां मम प्रीत्यै कल्पास्थः कपि - राक्षसौ ।
गन्तुं प्रयतितासाथे प्रातः सह मया यदि ॥ २१ ॥

(इति ब्रुवति भगवति रामे सोत्साहौ कपीश-लङ्केशौ ब्रूतः—)

तौ—(बद्धाञ्जली)

भगवन्तं विना लोके को भृत्य-परिपालकः ।
अनुग्रहोऽयं काकुत्स्थ ! गन्तास्वो यत्त्वया सह ॥ २२ ॥
अनुमन्तास्वहे नाऽवां भवन्तं विरहं लघुम् ।
अपि प्राप्य सुरेन्द्रत्वं किं नु प्रत्तं त्वयाऽस्पदम् ॥ २३ ॥

(इति प्रणमतो जवनिका-पातः)

[राम-सीता-संवादः पुष्पकस्थोऽष्टाचत्वारिंशः ४८]

(द्वाविंश-सर्गगो नानाछन्दस्कः)

(तत्र रामां विनोदयन् रामः क्रमात्सर्वस्थलानि विवृणुते—)

राम :—(उपजात्या—)

सेतुं महेन्द्रं मलयं सविन्ध्यं
स-माल्यवन्तं गिरि मृष्यमूकम् ।
स-दण्डकारण्यवतीं च पम्पाम्
सीते नदीं पश्य च नर्मदां ताम् ॥ २४ ॥

अपि च—(प्रहर्षिण्या—)

एते ते मुनिजन - मण्डिता दिगन्ताः
शैलोऽयं ललितवनः स चित्रकूटः ।
गङ्गेयं सुतनु विशाल - तीर-रम्या
कल्पस्थो वटतरुराचितस्तटेऽस्याः ॥ २६ ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयि जानकि ! (स्रग्धरया—)

स्थानं नः पूर्वजानामियमधिकमसौ प्रेयसी पूरयोध्या ।
दूरादालोक्यते या हुतविविधहविः-प्रीणिताऽशेषदेवा ॥
सोऽयं देशो रुदन्तं पुरजनमखिलं यत्र हित्वा प्रयाता-
वावां सीते वनान्तं सह धृतधृतिना लक्ष्मणेन क्षपान्ते ॥२८॥

सीता—(त्वरायमाणा) (शार्दूलविक्रीडितेन—)

तूर्याणामथ निःस्वनेन सकलं लोकं समापूरयन् ।
विक्रान्तैः करिणां गिरीन्द्र-सदृशां क्ष्मां कम्पयन् सर्वतः ॥
सानन्दाश्रुविलोचनः प्रकृतिभिः सार्द्धं सहान्तःपुरः ।
सम्प्राप्तो भरतः समारुतिरलं नम्रः समं मातृभिः ॥२९॥

तद्वयमवतराम त्वरितम्—

(इति अवतीर्य सर्वे यथायोग्यं मिलन्ति । सपुष्पवृष्टिर्जवनिकापातः)

(भारतीय-संस्कृतौ ४८ अष्टाचत्वारिंशत्संस्काराः समाम्नाताः सन्तीति तत्प्रतीका इमेऽष्टाचत्वारिंशत्संवादा व्याकरणपुङ्गवस्य भट्टिकाव्यशास्त्रस्य च्छात्र-संस्कारका ज्ञेया इत्यलम् ।)

एभिरष्टाचत्वारिंशत्संवादसंस्कारैः संस्कृतो व्याकरण-पुङ्गवः भट्टिकाव्यशास्त्रसंवादो ग्रन्थः शाणारूढरत्नवद्घर्षितो देदीप्यते । छात्रान् संस्कर्तुम् द्वौ चान्ते प्रहरिणौ संवादावपि स्तः । तत्रैकः ।

[छात्र-द्वय-संवादो द्वाविंशसर्गग ऊनपञ्चाशत्तमः ४९]

प्रथमच्छात्रः—

पाणिन्युपज्ञं किलशब्दशास्त्रम्
ततो मुनीनां त्रिक-संज्ञितं तत् ।
भट्टि - प्रभाकाण्ड - चतुष्टयेन
संवाद-संज्ञं शिवदं चकास्ति ॥

द्वितीयः—अथ किम् तथ्यम् पथ्यं च—प्रिय ! सखे शृणु—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(स्रग्विण्या—)

स स्वतन्त्रः कविः शब्दशास्त्रानुगं
राम-वृत्ताऽमृतप्लावितं सामरम्[2] ।
यच्चकारानु[3]प्रास - [4]प्रसादादिभी
रावणान्तामिधं काव्य मत्यद्भुतम् ॥
कालतस्तद्विधर्म - क्षितीशार्दिते
पारतन्त्र्य-प्रधाने युगेऽन्तर्हितम् ।
तस्य काव्यस्य मर्म-प्रकाशोऽधुना
भारते साधु-संवाद-नामाऽभिधः ॥

साम्प्रतं समुत्सुकानामाचार्याध्यापकानां कृतेऽवसरप्रदानार्थं वय मपसरामो रङ्गाद् । (इत्युभौ निष्क्रान्तौ जवनिकापातः)

[अध्यापक-द्वय-संवादः पञ्चाशत्तमः ५०]

(द्वाविंश-सर्गः)

(स्थानं श्रीबद्रीनाथवेदवेदाङ्गमहाविद्यालयः । तदीयौ प्रधानाचार्योपाचार्यौ श्रीमदिन्दुप्रकाशोपाध्याय - भक्तरामथपलियालौ परस्परं विमर्शयतः । तत्र प्रधानाचार्यो ब्रूते—)

प्रधानाचार्यः—अये 'उपाचार्य ! भट्टिकाव्येऽवसाने २२ सर्गे महाकविनोपनिबद्धस्य—

इदमधिगतमुक्ति - मार्ग - चित्रं
विवदिषतां वदतां च सन्निबन्धात् ।
जनयति विजयं सदा जनानां
युधि सुसमाहित मैश्वरं यथाऽस्त्रम् ॥३२॥

---

१. प्रकीर्णाधिकार-प्रसन्न-तिङन्ताभिधेन ।

२. अमरकोशेन सहेति विग्रहः । ३. 'प्रह्वेवा १ इति सूत्रोदाहरणे ३,४, इति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

998

इति श्लेषपद्यस्यार्थं भवच्छात्रा जानन्ति ?

उपाचार्याः—वाढं वाढं मदीया एव हि च्छात्रा मदाज्ञया सर्वथाऽदराद्—

'दीप-तुल्यः प्रबन्धोऽयं शब्दलक्षण - चक्षुषाम् ।
हस्तामर्श इवान्धानां भवेद् व्याकरणादृते ॥'

इति तदीय-पद्यानुसारं '[1]सम्प्रघुष्य क्रमात् पाणिनीयाष्टकं'—इत्यादि—

सूत्र-वृत्ति निर्माणप्रकारज्ञानाद् 'ऋजुपाणिनीयं' प्रथम-परीक्षा-सन्निवे-शितमधीत्य कृत-सूत्रार्थो मध्यमपरीक्षायां सर्वेऽपि भाट्टकाव्यमेव पठन्ति । यतो हि प्रतिशतमष्टानवतिमङ्कानुपलभ्य प्रथमश्रेण्यां परीक्षा मुत्तरन्ति ।

प्र० आ०—साधु साधु भवदाज्ञानुषां छात्राणामुद्यमादेव मदीय-विद्यालय-परीक्षा-परिणामः शतं प्रतिशतं भवतीति प्रान्तप्रसिद्धिः ।

उपा०—किमाश्चर्यमत्र यथाहि भट्टिमहाकाव्यं काव्यशास्त्रं गीयते । तथैव काव्य-विमर्शिका तट्टीकाऽपि शब्दशास्त्रप्रधानाऽष्टाध्यायी-पाठमपि शिक्षयतीति 'एकक्रियार्थ-द्वयकृत् प्रसिद्धा' इति न्यायात् काव्यशास्त्रं भट्टिग्रन्थमधीयानाश्छात्राः काव्यबोधेन सह प्रयोगसिद्धिमप्युपार्जयन्तीति सुदृढबोधास्ते भवन्तीति जानन्तु भवन्तः ।

---

१. सन्धिबोधात् पदच्छेदतोऽर्थं चरेत् । पूर्वसूत्रं परस्मिन् समाज्जयन् ॥
निर्विशेषां जहत्तद्विभक्तिं समाम् । पूर्वसूत्रं परस्मिन् समासज्जदा ॥
स्वाधिकारावधिं शृङ्खला-वृद्धितः । तत्समानं पदं स्वं जहद्धीतरत्
सर्वमेवोपहरीकरोत्यादरात् ॥ किन्तु तत्रापि चेद् यद् विशेष्यादिकं
तत्संमानं पदं चापि याति स्वतः इत्थमाविष्करोत्यर्थमत्यद्भुतं यो न
जन्मान्ततः क्वापि विस्मर्यते ।
इति पदार्थं गुरुभ्योऽभ्यस्य सूत्रवृत्ति निर्मातिव्या । इत्यलम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र० आ०—अस्तु-एवमेवच्छात्रा बद्बोधेलिमा येन शब्दशास्त्र-प्रधानं ज्योतिःशास्त्राध्ययनं स्यात्—

उपा०—आमाम् ! भवद्विद्यालये सर्वेऽपि व्याकरणेतर-विषया-ध्यायिनश्छात्रा भट्टिकाव्यशास्त्रमेव व्याकरणस्थानेऽधीयते। येन तेषा मभ्युदयो निश्चितो भवति। वदन्तु भवन्तोऽपि सर्वाऽभ्यु-दयमिह संवादान्ते—

स्युः शश्वद् भुवि मङ्गलानि सुधियां छात्रा गुरूपासकाः।
स्याद्विद्याव्यसनी जनोऽपि सकलः सत्यप्रिया नायकाः॥
नार्य्यः स्वीय - गुरुत्ववोधविमलाः शास्त्राध्वगाः कर्मठाः।
स्वात्म-ज्ञान-दृढा विभेद-रहिता विश्व-प्रिया मानवाः॥

(इति पुष्पवृष्टचां दृश्य-समाप्तिः संवाद-समाप्त्या ग्रन्थसमाप्तिश्च जवनिकापातः सर्वे विनिर्गताः।)

शास्त्रं काव्यविदः प्राहुः सर्वकाव्याङ्गलक्षणम् (काव्यप्रकाशादि)
काव्यं विशिष्टशब्दार्थसाहित्यं सदलंकृति (रघुवंशनपधादि)
शास्त्रकाव्यं चतुर्वर्ग-प्रायं सर्वोपदेशकृत (रामायण महाभारतादि)
भट्टिभौमक-काव्यादि काव्यशास्त्रं प्रचक्ष्यते। इति।

इति श्रीमता क्षेमधरिणा कौशल्याजेन विहाराभिजनेन काशी-वास्तव्येन राष्ट्रपति - सम्मानितेन महा - महाध्यापकेन पण्डितराजेन व्याख्यान-वाग्मिना दर्शनकेशरिणा सा०व्या० आचार्येण न्यायतीर्थेन डॉ० श्रीगोपाल शास्त्रिणा संगृहीतं सर्वच्छात्रोपयोगि संवादभट्टिकाव्य - शास्त्रं समाप्तम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनि-प्रज्ञा-अनुसन्धान
११४

परिशिष्टम्

योगवाशिष्ठनिबद्धं पुरुषार्थ-प्राबल्यम्

अतश्च जन्मजन्मान्तरभ्रमं विहाय केवलं पौरुषपरायणा एव सर्वे स्युरिति मेऽपि प्रबलः परामर्शः। अत्र श्रीमतो माधवमनावतारस्य भगवतः श्री कृष्णस्यापि महापुरुषस्य समर्थनमस्ति—

अस्ति चेदीश्वरः कश्चित्फलरूप्यन्यकर्मणाम्।
कर्तारम् भजते सोऽपि न ह्यकर्तुः प्रभुर्हि सः॥ (भा० १०।२४।१४)

वशिष्ठ उवाच---

सर्वमेवेह संसारे सर्वदा रघुनन्दन!
सम्यक् प्रयुक्तात् सर्वेण पौरुषात् समवाप्यते॥ १

अत्रैकं पौरुषं यत्नं वर्जयित्वेतरा गतिः।
सर्वदुःखक्षयप्राप्तौ न काचिदुपपद्यते॥२

न तदस्ति जगत्कोशे शुभ-कर्मानुपातिना।
यत्पौरुषेण शुद्धेन न समासाद्यते जनैः॥३

योऽयमर्थं प्रार्थयते तदर्थं चेष्टते क्रमात्।
अवश्यं तदवाप्नोति नचेदर्धान्निवर्तते॥४

पुरुषार्थेन देवानां गुरुरस्ति बृहस्पतिः।
शुक्रो दैत्येन्द्रगुरुतां पुरुषार्थेन चास्थितः॥५

पौरुषेण जिता दैत्याः स्थापिता भुवनेष्वधः।
रचितानि जगन्तीह विष्णुना नहि दैवतैः॥६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैन्यदारिद्र्य-दुःखार्ता अप्यन्ये पुरुषोत्तमाः ।
पौरुषेणैव यत्नेन याता देवेन्द्रतुल्यताम् ॥७
पौरुषेण दुरन्तेभ्यः संकटेभ्यः सुबुद्धयः ।
तमुत्तरन्त्यनायासान्नैवालसतया स्त्रया ॥८
यो यो यथा प्रयतते स हि तत्तत्फलैकभाक् ।
न तु तूष्णीं स्थितेनेह केनचित्प्राप्यते फलम् ॥९
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मनाऽत्मा न चेत् प्राप्तस्तदुपायो न चेतरः ॥१०
पुरुषातिशयः सर्वः सर्वभावोपमर्दने ।
ददात्यविघ्नेन फलं मनोहि मनसा ध्रुवम् ॥११
मनसैव मनस्तस्मात्पौरुषेण पुमानिह ।
स्वकमेव स्वकेनैव योजयेत् पावने पथि ॥१२
ईश्वरप्रेरितो गच्छेत्स्वर्गं नरकमेव वा ।
इत्येवं तु पराधीनः पशुरेव न संशयः ॥१३
ये शूरा ये च विक्रान्ता ये प्राज्ञा ये च पण्डिताः ।
तैस्तैः किमिव लोकेऽस्मिन् वद दैवं प्रतीक्ष्यते १४
ये समुद्योगमुत्सृज्य स्थिता दैवपरायणाः ।
ते धर्ममर्थकामं च नाशयन्त्यात्मविद्विषः ॥ १५
न च निस्पन्दता लोके दृष्टेह शवतां विना—
स्पन्दाच्च फल-सम्प्राप्तिस्तस्माद्दैवं निरर्थकम् ॥१६
दैवं न किञ्चित्कुरुते मूर्खाणां दैवकल्पना ।
तेऽलसा लोकहन्तारस्तत्परास्तेक्षयं गताः ॥१७
समाश्वासन-वागेका न दैवं परमार्थतः ।
मूर्खाणां सम्प्रदायेऽस्य दैवस्य परिपूजनम् ॥१८

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिद्धस्य पौरुषेणेह फलस्य फलशालिना ।
शुभाशुभार्थ-सम्पत्तिर्दैव-शब्देन शब्दिता ॥१९
पौरुषोपनता नित्यमिष्टानिष्टस्य वस्तुनः ।
प्राप्तिरिष्टाऽप्यनिष्टा वा दैव-शब्देन शब्दिता ॥२०
भावीत्यवश्यमेवार्थः पुरुषार्थैकसाधनः ।
यः सोऽस्मिंल्लोक-संघाते दैव-शब्देन शब्द्यते ॥२१
यदेव तीव्रसंवेगाद् दृढं कर्म कृतं पुरा ।
तदेव दैव - शब्देन पर्यायेणेह कथ्यते ॥२२
बालः प्रबलपुंसेव तज्जेतुमिह शक्यते ।
पौरुषेण बलवता दुर्बलं पूर्वपौरुषम् ॥२३
द्वौ हुडाविव युध्येते पुरुषार्थौ परस्परम् ।
य एव बलवांस्तत्र स एव जयति क्षणात् ॥२४॥
द्वयो रद्यतनस्यैव प्रत्यक्षाद्बलिता भवेत् ।
दैवं जेतुम् यतो यत्नैर्बालो यूनेव शक्यते ॥२५॥
परं पौरुषमाश्रित्य दन्तैर्दन्दान् विचूर्णयन् ।
शुभेनाशुभमुद्युक्तम् प्राक्तनम् पौरुषं जयेत् ॥२६॥
प्राक्तनः पुरुषार्थोऽसौ मां नियोजयतीति धीः ।
बलादधःस्पदीकार्या प्रत्यक्षादधिका न सा ॥२७॥
तावत्तावत्प्रयत्नेन यतितव्यं सुपौरुषम् ।
प्राक्तनं पौरुषं यावदशुभं शाम्यति स्वयम् ॥२८॥
दोषः शाम्यत्यसन्देहं प्राक्तनोऽद्यतनैर्गुणैः ।
पौरुषे यत्नमातिष्ठेदायुर्वेदादिदृष्टिभिः ॥२९॥
बलिना पौरुषेणेह परास्तं पूर्वपौरुषम् ।
अग्निनाभस्मतां याति स्वप्ने वा संसृजेत्फलम् ॥३०॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उच्छास्त्रं शास्त्रितं चेति द्विविधं पौरुषम् स्मृतम् ।
तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम् ॥३१॥
तस्मात्पौरुषमाश्रित्य सच्छास्त्रैः सत्समागमैः ।
प्रज्ञाममलतां नीत्वा संसारजलधिं तरेत् ॥३२॥
इत्येतदुदितं रामोद्यमोपनिषदमृतम् ।
श्रुत्वा व्यवहरन् कार्ये मर्यादापुरुषो भवेत् ॥३३॥
यथावशिष्ठोद्यम-सत्प्रयोगतोऽभवत्स रामो विजयी दशास्यजित्—
समर्थरामप्रभुसन्निदेशतः, शिवोऽपि मोहम्मदवातुकस्तथा ॥३४॥
(शिखरिण्या)—विजेतव्या लङ्का चरणतरणीयो जलनिधिः ।
विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ॥
पदातीरामोऽसौ सकलमवधीद्राक्षसकुलम् ।
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥३५॥
क्व साम्राज्यं मोहम्मद-प्रबलखड्गव्यवजितम् ।
समृद्धं दुर्भेद्यं हिमगिरित आसेतु विततम् ॥
शिवोऽसावेकाकी सुदृढमजयद् दक्षिणदिशं ।
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे ॥३६॥
इति विमृशन्तु उद्यमिनः पौरुषप्रियाः संवाद-पाठकाः । इति शुभं भूयात्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हमारा साहित्य

१—प्रशिक्षण संविधानम्

२—गोमहिमाभिनय नाटकम्

३—हिन्दुधर्मोपदेशिका

४—छन्दः प्रबन्धः

५—नारीजागरण (हिन्दी)

६—पाणिनीयप्रबोधनाटकम् (संस्कृतम्)

७—संस्कृत-संस्कृति-शिक्षकम्

८—गीतामृत-व्याकरणम्

९—भट्टिकाव्य-शास्त्रसारः (संवादात्मकः)

१०—पाणिनीय प्रशस्ति (हिन्दी) [illegible]

११—पाणिनीय-प्रदीपः ४)

१२—ऋजुपाणिनीयं (साङ्गम्) २)

१३—वीराङ्गना वैभवम् २)

१४—संस्कृत शिक्षकम् ४)

शास्त्रि-मण्डल

डी. ५९/३१ सिगरा : वा रा ण सी

CC-0.Panini Kanya Maha Vidyalaya Collection.